Nāṭyāśāstra of Bharata

(An Attempt at Critically Editing Chs. I, II, VI, & VII]
A U.G.C. EMERITUS – FELLOWSHIP PROJECT

by

Prof. R. I. Nanavati

(UGC – Em. Fellow 2007-09)

Carried out at
Oriental Institute
M.S. University of Baroda
VADODARA
2009

Nātyāśāstra of Bharata

(An Attempt at Critically Editing Chs. I, II, VI, & VII]
A U.G.C. EMERITUS – FELLOWSHIP PROJECT

by
Prof. R. I. Nanavati
(UGC – Em. Fellow 2007-09)

Carried out at
Oriental Institute
M.S. University of Baroda
VADODARA
2009

Printed and Distributed by:
Prof. R. I. Nanavati
B-103, Rajlaxmi Society,
Old Padra Road,
Vadodara – 390007.
Ph. (0265) -2358932

Layout Composed by:
Shri Kashyap Desai
Pixel Graphics
GF-12, Saffron Complex,
Fatehgunj,
Vadodara – 390002.
(M) +91-9825178540

PREFACE

The following pages contain a report of the U.G.C.–approved Emeritus-Fellowship-Project on "Preparing a Critical Edition of Bharata's Nāṭyāśāstra (Chs. I, II, VI & VII)" awarded to the undernamed person. He was assigned to the Oriental Institute by the then Vice-Chancellor of the M. S. University of Baroda. The Project was started in November 2007 and had two years' tenure. The report of the project - work is presented here.

The project has suffered – any such project in India should – many adverse factors – institutional inertia, personal tantrums, official imperviousness, insensitive delay in delivering project-material etc. etc. Yet some representative mss. could be obtained, their readings could be utilized for collation and at least some kind of a pre-format of critical text – a defendable text has been reached. That is presented here.

The text – any such text, for that matter – would have its lapses, for which the indulgence of Scholars is craved. However, if some thing in this effort is found acceptable, the project-fellow will feel his endeavour rewarded.

ā paritosād vidusām -

R. I. Nanavati

CONTENTS

INTRODUCTION

Ancient Indian Drama was a composite art-form involving literary text, art of acting, dance, music, and stage-craft. The *Natya-sastra* (NS) ascribed to Bharata is the most ancient text on this art and aims at describing the total theatre along with its aspects of literature (poetic qualities, theme, structure etc.), of metrics (syllabic or rhythmic), of acting (natural or dramatized), of music (notes, beats), musical instruments (of four kinds), of dance (movements of various body-parts, artistic poses), stage-craft, etc. Naturally, its importance as a source-book for all these arts can not be over-estimated.

The text of the NS has come down to us in two versions (or traditions) – one with the commentary of Acarya Abhinavagupta, the other without any commentary. The texts of these two versions are widely and significantly divergent as noted by scholars like Kane, De and others. The commented version (published by The Oriental institute, Vadodara, in its Gaekwad's Oriental Series – G.O.S. – in four volumes) has been revised in the light of some new manuscript evidence. The uncommented version is published mainly from two places: Mumbai (Nirnayasagar) and Varanasi (Chowkhambha). Even these two have many discrepancies.

Manomohan Ghosh had attempted a critical edition of this uncommented version way back in fifties and sixties. He was able to use only two volumes of the NS of G.O.S.. In the meanwhile, some more manuscripts of NS have been noticed and the text arrived at by Ghosh needs to be revised in the light of this new material. Unni (NS, Delhi, 1998, 4 volumes, Introduction, Text, Translation, Notes) has clearly said, "I have not attempted to bring out a critical text based on the numerous Kerala manuscripts since the work involved is beyond the capacity of an individual."

It would, therefore, be advisable for an individual to attempt a critical edition of only some chapters of NS. Accordingly, a proposal was put before the U.G.C. authorities to sanction a project of attempting to prepare a critical text of only some chapters of NS - Chs. I, II, VI & VII. The proposal was approved and sanctioned as an Emeritus Fellow Project which started in November 2007.

The first task in the project was to secure copies of the text of relevant NS chapters from Mss lying in various institutions and M-libraries. It should be noted here that the response to our letters for copies of NS-Mss lying in various Research Institutes was not at all encouraging. However, the copies of the codices described above could be obtained after much perspiration and persuasion. Of these, the M-mss which are all in Malayalam Script

copied in CD-form had to be transcribed in Devanagari Script by transcribers. The readings of all the Mss were then systematically collated in the collation-sheets from which the editor has attempted to construct a critical text of the pre-decided four chapters of NS presented here in the following pages. While reconstructing the text, the observations made about the various mss, their readings, the relations between different codices of different groups have been noted at the places of their occurrences; much therefore need not be said here. Only a few broad general remarks would be in place.

(1) In spite of the non-encouraging response to our call for copies of Mss, we have been able to secure copies from four different corners of the country. One (codex D_1), from Oriental Institute, Vadodara, two (codices V_1 & V_2) from Varanasi, four (codices P_1, P_2, P_3 & P_4) from BORI, Pune, and five (codices M_1, M_2, M_3, M_4, M_5) from ORI & ML, Trivandram. These, at least, represent four different Mss-traditions. The source of D_1 is not known, but it has been revised throughout mainly under influence of Pune Mss. All the 4 Pune-Mss are very closely similar to each-other and reveal their being copied from one source. P_4, it has been observed in the notes, deserves special attention. The two codices from Varanasi are actually comparatively recent transcripts of older Mss. V_1 has only Chs. I to V and we could use it only for Chs. I & II; V_2 is complete and, as noted in Crit. app. and in Notes, has a great affinity to M_3 and often M_1. The five Malayalam Mss constitute a fairly homogenous group of readings, yet they also have shown quite a number of variants.

(2) These Mss. tend themselves to two obvious groups, the northern version which we have called here the larger version (LV) which is contained in the D_1 and V & P mss. The southern version, for our purposes, is represented here by the five M-mss, and which we refer to as SV.

(3) It has been observed repeatedly that the Southern version arising here from the M-mss, is shorter, compact, avoiding needless adjectives and statements, and thus appears to be more ancient and nearer to the author's text. This will be clear from readings noted in the Crit. app. throughout the text. Yet two instances are particularly noted here.

a) The following verse found in LV (corroborated by D_1, V_1, $P_{1\text{-}4}$) is absent in SV.

अहं वः कथयिष्यामि निखिलेन तपोधनाः।

संग्रहं कारिकां चैव निरुक्तं च यथाक्रमम् ।। NS.VI.5

The words संग्रह, कारिका and निरुक्त already occur in verse VI. 3 above, and there is no need for भरत to say that now he will speak of (or describe) all the topics in proper order. Instead, in the SV, Sage Bharata straightaway begins to speak about these topics with a natural presumption that the knowledges (= sciences) are many and arts/crafts infinite and it is not possible any how to go to the end of the (Science of) Drama, but he will briefly (संग्रह) explain this drama in few brief aphorisms which can enable one to infer the deeper meanings from them.

This tendency of SV towards brevity will be observed at many places where passages of LV are relegated to the critical apparatus. Such passages reveal Puramic style or method of repeating the words of the questioner to obtain a sort of continuity of narration.

While going through the readings of these Mss, there also is experienced a general feeling that the SV nearly always agrees with the readings of अभिनव. And it is obvious that no extant Ms could be earlier than the times of अभिनव. There is, therefore, no denying of the fact that अभिनव has not only influenced the entire history of Poetic Theory after him, he may also have influenced the NS-Mss. tradition to a considerable extent. However, it is equally true that the text - tradition of NS in its original or uncommented form is also retained more faithfully and coherently in the South.

(b) A stronger confirmation of the SV being older is found in the following passage:

After describing the colours and deities of the *rasas*, the topic of discribing the ancillories of the individual *rasas* is launched in LV in these words:

इदानीं विभावानुभावव्यभिचारिसंयुक्तानां लक्षणनिदर्शनान्यभिव्याख्यास्यामः, स्थायिभावांश्च रसानामनुक्रमिष्यामः ।

The SV has a significant variant for the last part of the statement:

स्थायिभावांश्च रसत्वमुपनेष्यामः ।

This is the reading of all the five M-mss (and of V_2 also). $P_{1\text{-}4}$ and D_1 have the reading रसानामनुक्रमिष्यामः । (D_1, though, adds in margin the variant रसत्वमुपनेष्यामः). It should be noted that V_2 has generally shown affinity in its readings to M_3 which fact is significant.

What is important is that this reading is quoted and confirmed by अभिनव, vide his statement तथा च चिरन्तनपुस्तकेषु 'स्थायिभवान् रसत्वमुपनेष्यामः' etc. Abhinava, of course, in the same breath also quotes further इत्यनन्तरं शान्तो नाम शमस्थायिभावात्मकः इति शान्तलक्षणं पाठ्यते ।

A word may be added here: The Southern Palm-leaf Mss are constantly corrupt or unclear due to the misreadings of orthographically closely similar letters. The running text is also broken at many places, thus missing large parts of the text. It would be advisable, therefore, to first prepare a Southern or Malayalam version of the text; this could also serve as the basis for Southern recension; comparing it with other versions thereafter would also be comparatively much easier and reliable.

(4) While registering the readings of various codices in the collation sheets, scribal errors such as grammatical errors, orthographical confusions like व/ब or प/व and orthographical variations like स्वायम्भुवेऽन्तरे written as स्वायंभुवेंतरे are generally neglected.

Observations made while collating the readings from various mss, are given in the notes. However, a few important derivations may be set hereinbelow.

(1) In the famous sentence नहि रसाहते कश्चिदर्थः प्रवर्तते, the emphasis in the reading कश्चिदप्यर्थः is fully justified.

(2) The reading स्थायिभावा रसत्वमाप्नुवन्ति। is confirmed by mss-evidence as also by अभिनवगुप्त. भट्ट लोल्लट (as also दण्डिन्, कुन्तक etc.) would thus seem to be nearest to the poetic views of Bharata.

(3) There appears to be a system in the treatment of the भावs of various levels.

(4) The distinction between अनुभावs and सात्त्विकभावs very subtly reveals the essence of real acting explained further by भट्ट शङ्कुक as against artificial or mechanical acting.

(5) The interpolatory, nature of शान्तरसप्रकरण is once again confirmed by Mss-evidence.

DESCRIPTION OF
THE MANUSCRIPTS COLLATED

Codex Sign	Source & Description
D_1	Oriental Institute, M.S. University, Vadodara. MS. No. 11629, paper, (First Three Folios missing), Devanagari Script.
M_1	Oriental Research Institute and Manuscripts Library, Kerala University, Trivandram. No. 8919, Palm-leaf, Folios-121. Complete, 36 Chapters, good condition. Malayam Script, size 5x46 cms., 8 lines on each folio, 75 letters to a line.
M_2	ORI & ML, Trivandram No. 20413, Palm-leaf, Folios 136, Incomplete, Chs. I to 32, Good condition, Malayalam Script, 5.5 x 44 cms., 9/11 times to a folio, 60 letters to a line.
M_3	ORI & ML, Trivandram No. 20414, Palm-leaf, Folios 118, Incomplete, Chs. 1 to 22, 23 continues. Worm-eaten, few folios broken, Malayalam Script, 5.5 x 46 cms., 11 lines to a folio, 50 letters to a line.
M_4	ORI & ML, Trivandram No. 20412, Palm-leaf, Folios 154, Incomplete, upto Ch. 31, worm-eaten, very brittle, Malayalam Script, 5x58 cms, 8 lines to a folio, 100 letters to a line.
M_5	ORI & ML, Trivandram No. 5681, Palm-leaf, Folios 190, Complete, 36 chapters, slightly worm-eaten, Malayalam Script, 4.5x52 cms., 8 lines to a folio, 70 letters to a line.
V_1	Sampurnanand Sanskrit University, Varanasi. No. 40767, Paper, Folios 90. Incomplete, upto ch. 5, transcript of another manuscript, Devnagari Script 17x28 cms., 25 lines to a page, 16 letters to a line.

V_2	Sampurnanand Sanskrit University, Varanasi. No. 42727, Folios 545, Copies from other manuscript (completed copy on 12/11/1919?). Devanagari Script, 18.5x28.5 cms., 20 lines to a page, 18 letters to a line.
P_1	Bhandarkar Oriental Research Institute, Pune. No. 68/1873-74, Folios 260, copied V.S. 1930, Devanagari Script, 29x13.5 cms., 10 lines to a page, 35 letters to a line.
P_2	BORI, Pune. No. 69/1873-74, Folios 237, Copied V.S. 1931, Devanagari. Script, Size 28.5x13.5 cms., 11 lines to a page, 32 letters to a line.
P_3	BORI, Pune. No. 71/1873-74, Foll. 237, Copied V.S. 1931, Devanagari Script, Size 28x13.5 cms., 11 lines to a page, 35 letters to a line.
P_4	BORI, Pune. No. 72/1873-74, Foll. 260, V.S. 1930, Devanagari Script, Size 28.5x13.5 cms., 10 lines to a page, 33 letters to a line.

Acknowledgements & Thanks

- Chairman, Authorities and Selection Committee, University Grants Commission, Delhi for accepting the proposal and sponsoring the project.
- Prof. Manoj Soni & Prof. Ramesh Goel, Former and Present Vice-Chancellors, M. S. University of Baroda, for allowing me to accept the U.G.C. Emeritus Fellowship and allowing me the benefit of University Infrastructure.
- Prof. M. L. Wadekar, (I/C) Director, Oriental Institute, M.S.U., Vadodara, for providing the infrastructural facilities at the Oriental Institute for the period of the Project (Nov. 2007-Nov. 2009).
- Friends at O.I., M.S.U. particularly Dr. Usha Brahmachari, Dr. Meena Pathak, Dr. Sweta Prajapati, Dr. Sharmila Bagchi for kind assistance in the project in various ways.
- Prof. G.C. Tripathi and Shri Rana, National Manuscripts Mission, Delhi, Prof. Siniruddha Dash, New Catalogus Catalogorum Project, Madras Univ, Chennai, for providing the basic data.
- Dr. Ms. Heena Kotak & Mrs. Neena Bhatt for helping in the project-work of decipherment and collation of MSS - readings and the process of critical editing.
- Shri P. L. Shaji (Trivandram), Shri Krishnakumar (Trivandram), Dr. Dharmendra Bhatt (Ahmedabad) for decipherment of Malayalam–Mss–readings.
- The authorities and friends of the Institutes for providing copies of MSS.
  - Prof. M. L. Wadekar, Director, Oriental Institute, M.S.U., Vadodara
  - Prof. Smt. Saroja Bhate (Director), Shri Bapat, and friends at MSS Section, Bhandarkar Oriental Research Institute, Pune.
  - Prof. Shitalaprasad Upadhyaya (Dharmashastra Sankaya) and the Librarian, Sampurnanand Sanskrit University, Varanasi.
  - Dr. Vishalakshi and Dr. Sulekha, (Ex. & Present) Directors, Oriental Research Institute & Manuscripts Library, Kerala University, Trivandram.
- Scholars who encouraged the project in various ways : Prof. V. N. Jha (Pune), Prof. Rewaprasad (and Dr. Sadashiva) Dwivedi (Varanasi), Prof. Kamlesh Dutt Tripathi (Varanasi), Prof. Siniruddha Dash (Chennai), Dr. Balakrishna Sharma (Ujjain).
- Shri Kashyap Desai, Pixel Graphics, Vadodara for all the warm co-operation and smooth and neat execution of layout and composition work.

BIBLIOGRAPHY

Editions of Natyasastra

(1) *श्रीभरतमुनिविरचितं नाट्यशास्त्रम्* - सं.पं. केदारनाथ दुर्गाप्रसाद,

प्र. निर्णयसागर प्रेस, बम्बई, ई.सं. १९४३

(Reprinted by Bharatiya Vidya Prakashan, Delhi, 1983, and

by Rashtriya Sanskrit Sansthan, Delhi, 2002).

(2) *Natyasastra of Bharatamuni* (with the commentary Abhinavabharati), (Gaekwad Oriental Series, No. 36, 1926 ed. M. Ramkrishna Kavi) Revised by, Dr. K. Krishnamoorthy (4th edn. 1992), Pub. Oriental Institute, Vadodara.

(3) *नाट्यशास्त्रम् भरतमुनिप्रणीतम्* (with English Translation) Vol. II. ed. & tr. by Dr. N.P. Unni., 1998, Pub. Nag Publishers, Delhi.

(4) *Natyasastra (Ascribed to Bharatamuni)* (4 vols.) (Reprint) 2003, ed. Manomohan Ghosh, Chowkhanmba Sanskrit Series office, Varanasi.

(5) *भरतमुनिप्रोक्तं नाट्यशास्त्रम्* (हिन्दी अनुवाद सहित) - सं.प्रो. रेवाप्रसाद द्विवेदी, २००५, प्र. कालिदास संस्थान, वाराणसी.

(6) *श्रीमद्भरतमुनिप्रणीतं नाट्यशास्त्रम्* - (Based on Baroda recension) ed. Dr. Sudhakar Malaviya, 1997, Pub. Krishnadas Academy, C/o. Chowkhamba Sanskrit Series Office, Varanasi.

(7) *Natyasastra of Bharatamuni* (4 vols.), ed. R.S. Nagar, 2004, Pub. Parimal Publication, Delhi.

Secondary Books

- Vatsyayan, Dr. Kapila, *Bharata : The Natyasastra*, 2001, Sahitya Akademi, Delhi.
- Krishna, Daya (Ed.), *India's Intellectual Traditions*, 2003, ICPR, Delhi.
- Srinivasan, Srinivasa Ayya, *On the Composition of the Natyasastra*, 1980, Verlag für Orientalistische Fachpublikationen, Reinbek, Germany.
- द्विवेदी, डॉ. पारसनाथ : *नाट्यशास्त्र का इतिहास*, २००४, चौखम्बा विद्याभवन, वाराणसी
- दीक्षित, सुरेन्द्रनाथ : *भरत और भारतीय नाट्यकला*, १९८९, मोतीलाल बनारसीदास, दिल्ली
- ओझा, पं. गौरीशंकर : *प्राचीन भारतीय अभिलेख*, (Revised) 2006, Bharatiya Kala Prakashan, Delhi.

Nāṭyāśāstra of Bharata
(I, II, VI, VII)

CRITICAL TEXT

प्रथमोऽध्यायः ।

प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ।। १ ।।

समाप्तजप्यं व्रतिनं स्वसुतैः परिवारितम् ।
अनध्याये कदाचित्तु[1] भरतं नाट्यकोविदम् ।। २ ।।

मुनयः पर्युपास्यैनमात्रेयप्रमुखाः पुरा[2] ।
पप्रच्छुस्ते महात्मानो नाट्यवेदसमुद्भवम्[3] ।। ३ ।।

कत्यङ्गः[4] किंप्रमाणश्च प्रयोगश्चास्य[5] कीदृशः ।
सर्वमेतद्यथातत्त्वं भगवन्वक्तुमर्हसि ।।४।।

तेषां तु वचनं[6] श्रुत्वा मुनीनां भरतो मुनिः ।
प्रत्युवाच[7] ततो वाक्यं नाट्यवेदकथां प्रति ।।५।।

भवद्भिः शुचिभिर्भूत्वा तथावहितमानसैः ।
श्रूयतां नाट्यवेदस्य संभवो[8] मुनि[9]निर्मितः ।।६।।

पूर्वं कृतयुगे विप्रा वृत्ते स्वायंभुवेऽन्तरे ।
त्रेतायुगे संप्रवृत्ते[10] कामलोभ[11]वशंगते ।।७।।

ईर्ष्याक्रोधा[12]दि[13]संमूढे लोके सुखितदुःखिते ।
देवदानवगन्धर्वै[14] यक्षरक्षो[15]महोरगैः ।।८।।

V_{1-2} नाट्यशास्त्रप्रारंभः / P_{1-4} ।। ॐ नमो श्रीगणेशाय ।। / M_{1-5} श्रीगणपतये नमः अविघ्नमस्तु ।

→ D1 has first two folios missing. The text begins at 45c after the word श्लक्ष्ण.

1. P_{1-4} त्तं, 2. M_{2-5} तदा, 3. V_{1-2}, P_{1-4} नियतेन्द्रियबुद्धयः ।

→ After 3cd, LV ins.

* योऽयं भगवता सम्यग्ग्रथितो वेदसंमितः । नाट्यवेदः कथं ब्रह्मन्नुत्पन्नः कस्य वा कृते ।। (See note)

4. V_{1-2} °त्यंशः, 5. V_2 hypermetrical °गस्याश्चास्य

6. P_{1-4} तद्वचनं, 7. M_1 °वाप, om.ततो 8. P_{2-4} संक्षेपो 9. LV ब्रह्म°, 10. M_4 V_{1-2} ऽथ संप्राप्ते°

→ After 7c, LV ins.

* मनोर्वैवस्वतस्य च । ग्राम्यधर्मे प्रवृत्ते तु

11. P_{1-4} °लाभ°

12. M_2 °कासादि°, 13. M_1 M_5 V_{1-2} °धाभिसं°, 14. M_2 V_{1-2} °र्वयक्ष°, 15. LV रक्षो°

जम्बूद्वीपे समाक्रान्ते लोकपालप्रतिष्ठिते ।
महेन्द्रप्रमुखैर्देवैरुक्तः किल पितामहः ।।९।।

क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत् ।
न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु ।।१०।।

एवमस्त्विति तानुक्त्वा देवराजं विसृज्य च ।
सस्मार चतुरो वेदान्योगमास्थाय योग[1]वित् ।।११।।

धर्म्यमर्थ्यं[2] यशस्यं च सोपदेश्यं[3] ससंग्रहम् ।
सर्वशास्त्रार्थसंपन्नं सर्वशिल्पप्रवर्तकम् ।।१२।।

नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम् ।
प्रोक्त्वा तु भगवान् देवान्[4] सर्वान्वेदाननुस्मरन् ।।१३।।

जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च ।[5]
यजुर्वेदादभिनयान्रसानाथर्वणादपि ।।१४।।

उत्पाद्य नाट्यवेदं तु ब्रह्मोवाच सुरेश्वरम् ।
कुशला ये विदग्धाश्च प्रगल्भाश्च जितश्रमाः ।।१५।।

तेष्वयं नाट्यसंज्ञस्तु[6] वेदः संक्राम्यतां त्वया ।
तच्छ्रुत्वा वचनं[7] शक्रो ब्रह्मणा समु[8]दाहृतम् ।।१६।।

→ After 10d, LV ins.
तस्मात्सृजापरं वेदं पञ्चमं सार्ववर्णिकम् ।
1. V_{1-2} P_{1-4} तत्त्व^0, **2.** P_{1-4} धर्ममर्थं, **3.** LV ^{0}देशं
→ After 12ab, LV ins.
भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम् ।
4. V_{1-2} P_{1-4} एवं संकल्प्य भगवान्
→ After 13d, LV ins.
नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसंभवम् ।
5. M_5 प्राह शक्रं पितामहः ।
→ After 14d, LV ins.
वेदोपवेदैः संबद्धो नाट्यवेदो महात्मना । एवं भगवता सृष्टो ब्रह्मणा सर्ववेदिना ।।
→ After 15ab, LV ins.
इतिहासो मया सृष्टः स सुरेषु नियुज्यताम् ।
6. LV ^{0}संज्ञो हि, **7.** LV भगवान्, **8.** LV यदु^{0}

प्राञ्जलिः प्रणतो भूत्वा प्रत्युवाच पितामहम् ।
ग्रहणे धारणे ज्ञाने प्रयोगे चास्य सत्तम ।।१७।।

अशक्ता भगवन् देवा न योग्या[1] नाट्यकर्मणि ।
य इमे वेदगुह्यज्ञा ऋषयः[2] संशितव्रताः ।।१८।।

ते ह्यस्य[3] ग्रहणे शक्ताः प्रयोगे धारणे तथा ।
श्रुत्वा तु शक्रवचनं मामाहाम्बुजसंभवः ।।१९।।

त्वं पुत्रशतसंयुक्तः प्रयोक्तास्य भवानघ ।
आज्ञापितो विदित्वाहं नाट्यवेदं पितामहात् ।।२०।।

पुत्रानध्यापयामास प्रयोगं चापि तत्त्वतः ।
शाण्डिल्यं चैवं वात्स्यं च कोहलं दत्तिलं तथा ।।२१।।

जटिलाम्बष्ठकौ चैव तण्डुमग्निशिखं तथा ।
सैन्धवं सपुलोमानं शाड्वलिं विपुलं तथा ।।२२।।

कपिञ्जलिं बादिरं च यमधूम्रायणौ तथा ।
जम्बुध्वजं काकजङ्घं स्वर्णकं तापसं तथा ।।२३।।

कैदारिं शालिकर्णं च दीर्घगात्रं च शालिकम् ।
कौत्सं ताण्डायनिं चैव पिङ्गलं चित्रकं तथा ।।२४।।

---

1. LV अयोग्या, **2.** $M_{1,4}$ V_2 मुनयः, **3.** LV एतऽस्य

From Verse 21c, the names of the sons of भरत are mentioned. These are 105 in LV, and are retained in the Crit. text here (See note). The SV has the list as follows:

शाण्डिल्यं चैव वात्स्यं च कोहलं दत्तिलं तथा ।।
जटिलाम्बष्ठकौ चैव तण्डुमग्निशिखं तथा ।
पुलोमानं सैन्धवं च शाड्वलिं विपुलं तथा ।।
यमधूम्रायणौ चैव बादरिं च कपिञ्जलिम् ।
बन्धुलं वालुकं चैव मुष्टिकासैन्धवायनम् ।।
तैतिलं भार्गवं चैव शुचिं बहुलमेव च ।
अबुधं बुधसेनं च पाण्डुकर्णं सुकेरलम् ।।
मागधं सरलं चैव कर्तारं चोग्रमेव च ।
तुषारं पर्वतं चैव गोतमं बादरायणम् ।।
विशालं शबलं चैव वारुणिं सिंहमेव च ।
कालेयं भ्रमरं चैव तथा पीठमुखं मुनिम् ।।
नखकुट्टाश्मकुट्टौ च षट्पदं सोत्तमं तथा ।
अग्निकुण्डाज्यकुण्डौ च वितण्डयं ।
केकराक्षं हिरण्याक्षं कुशलं दुस्सहं तथा ।
जालं भयानकं चैव बीभत्सं सविचक्षणम् ।।
शिलापट्टं स्वर्णगुञ्जं त्रिशिखं शिखमेव च ।
किरीटिनं च माषं च तथा धन्विनमेव च ।।
शिलापट्टं स्वर्णगुञ्जं त्रिशिखं शिखमेव च ।
शङ्खवर्णमुखं षण्डं शङ्कुकर्णमथापि च ।।

Many of the names are repeated, some are transposed, some slightly altered, some mentioned in different grammatical expression. A comparative study of these names separately could be interesting.

बन्धुलं बालुकं चैव मुष्टिकं सैन्धवायनम् ।
तैतिलं भार्गवं चैव शुचिं बहुलमेव च ।।२५।।

अबुधं बुधसेनं च पाण्डुकर्णं सुकेरलम् ।
ऋजुकं मण्डकं चैव शम्बरं वञ्जुलं तथा ।।२६।।

मागधं सरलं चैव कर्तारं चोग्रमेव च ।
तुषारं पार्वतं चैव गौतमं बादरायणम् ।।२७।।

विशालं शबलं चैव वारुणिं सिंहमेव च ।
कालेयं भ्रमरं चैव तथा पीठमुखं मुनिम् ।।२८।।

नखकुट्टाश्मकुट्टौ च षट्पदं सोत्तमं तथा ।
पादुकोपानहौ चैव श्रुतिं चाषस्वरं तथा ।।२९।।

अग्निकुण्डाज्यकुण्डौ च वितण्ड्यं ताण्ड्यमेव च ।
केकराक्षं हिरण्याक्षं कुशलं दुःसहं तथा ।।३०।।

जालं भयानकं चैव बीभत्सं सविचक्षणम् ।
पुण्ड्राक्षं पुण्ड्रनासं च असितं सितमेव च ।।३१।।

विद्युज्जिह्वं महाजिह्वं शालङ्कायनमेव च ।
किरीटिनं च माषं च तथा धन्विनमेव च।।३२।।

→ After 34d, LV ins.
पितामहाज्ञयास्माभिर्लोकस्य च गुणेप्सया ।
प्रयोजितं पुत्रशतं यथाभूमिविभागशः ।
श्यामायनं माठरं च लोहिताङ्गं तथैव च
यो यस्मिन् कर्मणि यथा योग्यस्तस्मिन् च योजितः ।

शिलापट्टं स्वर्णगुञ्जं त्रिशिखं शिखमेव च ।
शङ्खवर्णमुखं षण्डं शङ्कुकर्णमथापि च ।।३३।।

शक्रनेमिं गभस्तिं चाप्यंशुमालिं शठं तथा ।
विद्युतं शातजङ्घं च रौद्रं वीरमथापि च ।।३४।।

भारतीं सात्त्वतीं चैव वृत्तिमारभटीं तथा ।
परिगृह्य प्रणम्याथ ब्रह्मा विज्ञापितो मया ।।३५।।

अथाह मां सुरगुरुः कैशिकीमपि योजय ।
एवं तेनास्म्यभिहितः प्रयुक्तश्च मया प्रभुः ।।३६ ।।

दीयतां भगवन् द्रव्यं कैशिक्याः[1] संप्रयोजकम् ।
मृदङ्ग[2]हारसंपन्ना रसभावक्रियात्मिका ।।३७।।

कैशिकी[3] श्लक्ष्णनै[4] पथ्या शृङ्गाररससंभवा ।
अशक्या पुरुषैः सा तु प्रयोक्तुं स्त्रीजनादृते ।।३८।।

ततोऽसृजन्महातेजा मनसाप्सरसो विभुः ।
मञ्जुकेशीं सुकेशीं च मिश्रकेशीं सुलोचनाम् ।।३९।।

सौदामिनीं देवदत्तां देवसेनां मनोरमाम् ।
सुदतीं सुन्दरीं चैव विदग्धां विपुलां तथा ।।४० ।।

→ After 35ab, LV ins.
समाश्रितः प्रयोगस्तु प्रयुक्तो वै मया द्विजाः ।
→ After 36ab, LV ins.
यच्च तस्याः क्षमं द्रव्यं तद्ब्रूहि द्विजसत्तम ।
1. $M_{2\text{-}5}$ कौशिक्याः, **2.** LV नृत्ताङ्ग[0]
→ After 37cd, LV ins.
दृष्टा मया भगवतो नीलकण्ठस्य नृत्यतः ।
3. $M_{2\text{-}5}$ कौशिकी, **4.** D_1 starts at this place
→ After 39ab, LV ins.
नाट्यालंकारचतुराः प्रादान्मह्यं प्रयोगतः[1] ।
{1. D_1 शक्रवचा (for प्रयोगतः)}
Again, we retain the list of the names of अप्सरस्[es] from the LV and give herebelow the list of names as in SV (See note on I21 above).
सुरभिं सुन्दरीं चैव विदग्धां विपुलां तथा ।।
मागधीमर्जुनीं चैव सरलां केरलां धृतिम् ।
सुनन्दां सुमुखीं चैव कलभां चेव मे ददौ ।।

सुमालां सन्ततिं चैव सुनन्दां सुमुखीं तथा ।
मागधीमर्जुनीं चैव सरलां केरलां धृतिम् ।
नन्दां सपुष्कलां चैव कलभां चैव मे ददौ ।।४१।।

[1]एवं नाट्यमिदं सम्यग्बुद्ध्वा सर्वैः सुतैः सह ।
स्वातिनारदसंयुक्तो वेदवेदाङ्गकारणम्[2] ।।४२।।

उपस्थितोऽहं लोकेशं प्रयोगार्थं कृताञ्जलिः ।
नाट्यस्य ग्रहणं प्राप्तं ब्रूहि किं करवाण्यहम् ।।४३।।

एतत्तु वचनं श्रुत्वा प्रत्युवाच पितामहः ।
महानयं प्रयोगस्य[3] समयः समुपस्थितः ।।४४।।

अयं ध्वजमहः श्रीमान्महेन्द्रस्य प्रवर्तते ।
अत्रेदानीमयं वेदो नाट्यसंज्ञः प्रयुज्यताम्[4] ।।४५।।

ततस्तस्मिन्ध्वजमहे निहता[5]सुरदानवे ।
[6]प्रहृष्टामरसंकीर्णे महेन्द्रविजयोत्सवे ।।४६।।

पूर्वं कृता मया नान्दी[7] ह्याशीर्वचनसंयुता ।
अष्टाङ्गपदसंयुक्ता विचित्रा वेदनिर्मिता[8] ।।।४७।।

तदन्तेऽनुकृति[9]र्बद्धा यथा दैत्याः सुरैर्जिताः ।
संफेटविद्रवकृता छेद्यभेद्याहवा[10]त्मिका ।।४८।।

→ After 41ef, LV ins.
स्वातिर्भाण्डनियुक्तस्तु सह शिष्यैः स्वयंभुवा । नारदाद्याश्च गन्धर्वा गानयोगे नियोजिताः ।।

1. M_1 V_{1-2} भाव, **2.** M_1 V_{1-2} ^{0}तारणम्, **3.** P_{1-4} ^{0}गश्च

4. M_1 प्रयो^{0}, V_2 प्रपू^{0} **5.** P_{1-3} निहत्य^0 P_{1-4} दानवैः, **6.** M_1 V_{1-2} प्रभ्रष्टा^{0}

7. M_{1-2} V_{1-2} नान्दी कृता मया पूर्वमाशी^{0}, **8.** M_5 V_{1-2} देवसम्मता

9. D_1 P_{1-4} तु कृति^{0} (for ऽनुकृति^{0}), **10.** P_{1-4} ^{0}भेद्यारवा^{0}

ततो ब्रह्मादयो देवाः प्रयोगपरितोषिताः ।
प्रददुर्हृष्टमनसः सर्वोपकरणानि नः[1] ॥४९॥

प्रीतस्तु प्रथमं शक्रो दत्तवान्[2] ध्वजमुत्तमम् ।
ब्रह्मा कुटिलकं[3] चैव भृङ्गारं वरुणः शुभम्[4] ॥५०॥

सूर्यश्छत्रं शिवः[5] सिद्धिं वायुर्व्यजनमेव च ।
विष्णुः सिंहासनं चैव कुबेरो मुकुटं तथा ॥५१॥

[6]श्राव्यत्वं प्रेक्षणीयस्य ददौ देवी सरस्वती ।
शेषा ये देवगन्धर्वा यक्षराक्षसपन्नगाः ॥५२॥

तस्मिन्सदस्यभिप्रेतान्[7] नानाजातिगुणा[8]श्रयान् ।
अंशांशैर्भावितान्[9] भावान्रसान्रूपं बलं तथा[10] ॥५३॥

[11]प्रददुर्हृष्टमनसः चित्रमाभरणं बहु ।
एवं प्रयोगे प्रारब्धे दैत्यदानवनाशने ॥५४॥

[12]अभवन्क्षुभिताः सर्वे दैत्या ये तत्र दर्पिताः ।
विरूपाक्षपुरोगांश्च विघ्नानुद्धार्य[13] तेऽब्रुवन् ॥५५॥

न क्षमिष्यामहे[14] नाट्यमेतदागम्यतामिति ।
ततस्तैरसुरैः सार्धं विघ्नमायामुपाश्रितैः[15] ॥५६॥

---

1. M_2 P_1 वः, 2. P_{1-4} दत्तस्तु, 3. M_1 V_{1-2} कमण्डलुं, 4. LV स्तथा, 5. P_{1-4} शिवा, 6. D_1 P_{1-4} om. 52 ab
7. M_1 ^{0}भिव्रतान् LV ^{0}तिप्रीतान्, 8. D_1 ^{0}श्रयाः P_{1-4} गणाश्रयाः, 9. D_1 M_3 P_{1-4} भाषित^{0}, 10. V_{1-2} बलिं क्रियाम् M_1 क्रिया^{0}
11. M_1 M_3 V_{1-2} दत्तवन्तः प्रहृश्टास्ते मत्सुतेभ्यः दिवौकसः, 12. M_1 V_{1-2} अथासुराश्चाभितोष्याः ये तत्रासन् समागताः ।
13. LV उत्सा(पा)द्य, 14. LV नेत्थमिच्छामहे, 15. D_1 V_{1-2} P_{1-4} विघ्ना मायामुपाश्रिताः

वाचश्चेष्टां स्मृतिं चैव स्तम्भयन्ति स्म नृत्यताम् ।
एवं[1] विध्वंसनं[2] दृष्ट्वा तत्र तेषां स[3] देवराट् ।।५७।।

[4]कस्मात्प्रयोगवैषम्यमित्युक्त्वा ध्यानमाविशत् ।
अथापश्यत्सदो[5] विघ्नैः समन्तात्परिवारितम् ।।५८।।

सहेतरैः सूत्रधारं नष्टसंज्ञं जडीकृतम् ।
अथोत्थाय द्रुतं क्रोधात्[6] किंचिदुद्वृत्तलोचनः ।।५९।।

रङ्गपीठगतान्विघ्नानसुरांश्चैव देवराट् ।
जर्जरीकृतदेहांस्तानकरोज्जर्जरेण सः ।।६०।।

निहतेषु तु[7] सर्वेषु विघ्नेषु सह दानवैः ।
संप्रहृष्य[8] ततो वाक्यमाहुः सर्वे दिवौकसः ।।६१।।

अहो प्रहरणं दिव्यमिदमासादितं त्वया ।
[9]जर्जरीकृतसर्वाङ्गा येनैते दानवाः कृताः ।।६२।।

[10]यस्मादनेन ते विघ्नाः सासुरा जर्जरीकृताः ।
तस्माज्जर्जर इत्येवं[11] नामतोऽयं भविष्यति ।।६३।।

[12]शेषा ये चैव विघ्नार्थ[13]मुपस्था[14]स्यन्ति विघ्नकाः[15] ।
दृष्ट्वैव जर्जरं तेऽपि गमिष्यन्त्येवमेव तु ।।६४।।

---

1. M_2 V_{1-2} तथा, 2. D_1 विध्वंसितं, 3. D_1 P_{1-4} सूत्रधारस्य, 4. LV तस्मात्, 5. V_1 तथा V_2 तदा (for सदो)
6. M_1 V_{1-2} उत्थाय त्वरितं शक्रः
→ After 59c, LV ins.
दिव्यं जग्राह स ध्वजम् । सर्वरत्नोज्ज्वलतनुः
7. D_1 नु, LV च, 8. D_1 प्रसह्य M_1 प्रहृत्य P_{1-4} प्रदास्य, 9. M_1 V_{1-2} om. the whole line
10. D_1 V_{1-2} नाट्यविध्वंसिनः सर्वे येन ते जर्जरीकृताः, 11. D_1 P_{1-4} एवेति, 12. M_1 om. the whole line
13. M_4 हिंसार्थ^0, 14. V_{1-2} ^{0}मुपया^{0}, 15. V_{1-2} हिंसकाः

एवमेवास्त्विति ततः शक्रः प्रोवाच तान्सुरान् ।
रक्षाभूतश्च सर्वेषां भविष्यत्येव[1] जर्जरः ।।६५।।

[2]प्रयोगे प्रस्तुते ह्येवं स्फीते शक्रमहे पुनः[3] ।
त्रासं संजनयन्ति स्म विघ्नाः शेषास्तु नृत्यताम्[4] ।।६६।।

दृष्ट्वा तेषां व्यवसितं मदर्थे विप्रकारजम्[5]।
उपस्थितोऽहं ब्रह्माणं सुतैः सर्वैः समन्वितः ।।६७।।

[6]निश्चिता भगवन्विघ्ना [7]आकाशे नाट्यकर्मणि ।
अधो[8]रक्षाविधिं सम्यगाज्ञापय सुरेश्वर ।।६८।।

ततस्तु विश्वकर्माणं ब्रह्मोवाच[9] प्रयत्नतः ।
[10]कुरु लक्षणसंपन्नं नाट्यवेश्म शुभं महत्[11] ।।६९।।

[12]सर्वलक्षणसंपन्नं कृत्वा नाट्यगृहं तु सः ।
प्रोक्तवान्द्रुहिणं गत्वा[13] सभायां तु कृताञ्जलिः ।।७०।।

सज्जं नाट्यगृहं देव[14] तदवेक्षितुमर्हसि ।
ततः सह महेन्द्रेण सुरैः सर्वैश्च सेतरैः[15] ।।७१।।

[16]अगच्छत्त्वरितो द्रष्टुं द्रुहिणो नाट्यमण्डपम् ।
दृष्ट्वा नाट्यगृहं ब्रह्मा प्राह सर्वान्सुरांस्ततः ।।७२।।

---

1. D_1 $P_{1\text{-}4}$ ^{0}त्येष, **2.** M_1 om. the verse upto संजन^{0}, **3.** D_1 पुरा $P_{1\text{-}4}$ पुरो, **4.** M_1 V_2 विघ्ना मद्बाधबुद्धयः ।
5. D_1 V_1 $P_{1\text{-}4}$ दैत्यानां विघ्नकारकम् । **6.** D_1 $P_{1\text{-}4}$ निःसृता, **7.** D_1 $V_{1\text{-}2}$ $P_{1\text{-}4}$ नाट्यस्यास्य विनाशने ।
8. D_1 $P_{1\text{-}4}$ अतो $V_{1\text{-}2}$ अस्य, **9.** D_1 $P_{1\text{-}4}$ आह ब्रह्मा, **10.** $P_{1\text{-}4}$ गुरु, **11.** D_1 $P_{1\text{-}4}$ महामते $V_{1\text{-}2}$ चकार सः ।
→ After 69, LV ins.
ततोऽचिरेण कालेन विश्वकर्मा शुभं महत् ।
12. The whole line: M_1 सर्वलक्षणसयथोक्तमेवन्तु ग्रहम् । $V_{1\text{-}2}$ कृत्वा यथोक्तमेवन्तु गृहं पद्मोद्भवाज्ञया ।
13. $V_{1\text{-}2}$ सो वा, **14.** D_1 तदेवे^{0}, **15.** $V_{1\text{-}2}$ सत्तमैः, **16.** M_1 P_1 आगतस्त्वरितो

अंशभागैर्भवद्भिस्तु रक्ष्योऽयं नाट्यमण्डपः ।
रक्षणे मण्डपस्याथ[1] विनियुक्तस्तु चन्द्रमाः[2] ।।७३।।

[3]यथादिग्लोकपालाश्च[4] प्रदिक्ष्वपि च मारुताः ।
नैपथ्यभूमौ मित्रश्च निक्षिप्तो वरुणोऽम्बरे[5] ।।७४।।

[6]वेदिकारक्षणे वह्निर्भाण्डे[7] सर्वे दिवौकसः[8] ।
[9]वर्णाश्चत्वार एवास्य[10] स्तम्भेषु विनियोजिताः ।।७५।।

आदित्याश्चैव रुद्राश्च न्यस्ताः[11] स्तम्भान्तरेष्वथ ।
[12]धारणीषु स्थिता भूताः शालास्वप्सरसस्तथा ।।७६।।

सर्ववेश्मसु यक्षिण्यो महीपृष्ठे महोदधिः
[13]द्वारशालानियुक्तौ तु कृतान्तः काल एव च ।।७७।।

स्थापितौ द्वारपत्रे[14] तु नागमुख्यौ[15] महाबलौ[16] ।
देहल्यां यमदण्डस्तु शूलं चोपरि संस्थितम्[17] ।।७८।।

द्वार पालौ[18] स्थितौ चोभौ नियतिर्मृत्युरेव च ।
पार्श्वे च रङ्गपीठस्य महेन्द्रः स्थितवान्स्वयम् ।।७९।।

स्थापिता मत्तवारण्यां विद्युद्दैत्यनिषूदिनी ।
स्तम्भेषु मत्तवारण्याः[19] स्थापिताः परिपालने[20] ।।८०।।

---

1. D_1 P_{1-4} ^{0}स्यास्य, 2. M_1 V_{1-2} नियुक्तो रजनीकरः । 3. M_1 M_4 V_{1-2} लोकपालास्तथा दिक्षु, 4. D_1 M_1 P_{1-4} वि^{0}
5. V_{1-2} P_{1-4} वरुणेश्वरः, 6. M_1 V_{1-2} वेदिकां पावकः पातु, 7. V_{1-2} भाण्ड^0, 8. LV सर्वदि^{0}
9. M_{2-5} वेदा (a much better variant, but, alas, not supported by MSS)
10. D_1 M_{1-2} V_{1-2} एवाथ, 11. M_1 V_{1-2} स्थिताः, 12. D_1 P_{1-4} धारणेष्वथ भूतानि
13. D_1 P_{1-4} द्वारशाखा^{0}; M_1 पाठशाला^{0} (obviously a mistake)
14. D_1 V_{1-2} ^{0}पार्श्वे P_{1-4} पात्रे, 15. V_{1-2} ^{0}राजौ, 16. P_{1-4} ^{0}खलौ (?), 17. D_1 P_{1-4} शूलं तस्योपरि स्थितम्, 18. M_{2-5} द्वारपक्षौ
19. M_1 वारण्यो V_{1-2} वारण्यां, 20. D_1 P_{1-4} ^{0}रक्षणे

भूता[1]यक्षपिशाचाश्च गुह्यकाश्च महाबलाः ।
जर्जरे तु वि[2]निक्षिप्तं वज्रं दैत्यनिबर्हणम् ।।८१।।

तत्पर्वसु वि[3]निक्षिप्ताः सुरेन्द्रा ह्यमितौजसः ।
शिरःपर्वास्थितो[4] ब्रह्मा द्वितीये[5] शंकरस्तथा ।।८२।।

तृतीये च स्थितो[6] विष्णुश्चतुर्थे स्कन्द एव च ।
पञ्चमे च महानागाः शेषवासुकितक्षकाः ।।८३।।

एवं विघ्नविनाशाय स्थापिता जर्जरे सुराः[7] ।
रङ्गपीठस्य मध्ये तु स्वयं ब्रह्मा प्रतिष्ठितः ।।८४।।

इष्टार्थं[8] रङ्गमध्ये तु क्रियते पुष्पमोक्षणम् ।
पातालवासिनो ये च यक्षगुह्यकपन्नगाः ।।८५।।

अधस्ताद्रङ्गपीठस्य रक्षणे ते[9] नियोजिताः ।
नायकं रक्षतीन्द्रस्तु नायिकां तु[10] सरस्वती ।।८६।।

विदूषकमथोङ्कारः शेषास्तु प्रकृतीर्हरः ।
यान्येतानि नियुक्तानि[11] दैवतानीह रक्षणे ।।८७।।

एतान्येवाधिदैवानि भविष्यन्तीत्युवाच सः ।
एतस्मिन्नन्तरे देवैः सर्वैरुक्तः पितामहः ।।८८।।

---

1. D_1 P_{1-4} भूतयक्ष^0, **2.** M_1 V_{1-2} चैव (for तु वि), **3.** V_{1-2} च (for वि^{0}), **4.** D_1 शिरःपार्श्वे ततो M_1 V_{1-2} ^{0}पर्वे^{0}
5. V_{1-2} ब्रह्मण्यनन्तरे (om. the last letters of the line), **6.** V_{1-2} भगवान् (for च स्थितो) M_1 रमा (for स्थितो)
7. D_1 P_{1-4} ^{0}श्वराः (meaning जर्जरेश्वराः ?), **8.** D_1 P_{1-4} इत्यर्थं V_{1-2} इष्ट्यर्थं, **9.** P_{1-4} विनि^{0}, **10.** V_1 च, **11.** D_1 P_{1-4} एतेषामधिदेवास्तु

साम्ना तावदिमे विघ्नाः स्थाप्यन्तां वचसा त्वया ।
[1]पूर्वं साम प्रयोक्तव्यं द्वितीयं दानमेव च ॥८९॥

तयोरुपरि भेदस्तु ततो दण्डः प्रयुज्यते[2] ।
देवानां वचनं श्रुत्वा ब्रह्मा[3] विघ्नानुवाच ह ॥९०॥

कस्माद्[4] भवन्तो नाट्यस्य विनाशाय समुत्थिताः[5] ।
ब्रह्मणो वचनं श्रुत्वा विरूपाक्षोऽब्रवीद्वचः[6] ॥९१॥

दैत्यैर्विघ्नगणैः सार्धं सामपूर्वमिदं ततः ।
योऽयं भगवता सृष्टो[7] नाट्यवेदः[8] सुरेच्छया ॥९२॥

प्रत्यादेशोऽयम[9]स्माकं सुरार्थं[10] भवता कृतः ।
तन्नैतदेवं कर्तव्यं त्वया लोकपितामह ॥९३॥

यथा देवास्तथा दैत्यास्त्वत्तः[11] सर्वेऽपि[12] निर्गताः ।
विरूपाक्षवचः श्रुत्वा ब्रह्मा वचनमब्रवीत् ॥९४॥

भवतां देवतानां च शुभाशुभविकल्पकम्[13] ।
कर्मभावान्वयापेक्षी[14] नाट्यवेदो मया कृतः ॥९५॥

नैकान्ततोऽत्र भवतां देवानां चापि[15] भावनम् ।
त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् ॥९६॥

---

1. M_1 अपूर्वं (hypermetric), 2. D_1 P_{1-4} प्रशस्यते ।, 3. M_1 V_{1-2} वचनमब्रवीत्
→ V_{1-2} om. 91a to 94d
4. D_1 P_{1-4} कथं, 5. D_1 P_{1-4} विनाशार्थमुपस्थिताः, 6. M_1 ^{0}ब्रवीदिदम्, 7. M_1 सम्यग्, 8. M_1 नाट्यवेदं प्रवर्तितम्
9. M_1 ममास्माकं, 10. M_1 देवार्थो, 11. M_1 सर्वे त्वत्तो 12. D_1 P_{1-4} पूर्वविनि^{0}
→ After 94d P_{1-4} ins. अलं वो मन्युना दैत्या विषादस्त्यज्यतामयम् । (M_1 V_{1-2} विषादं त्यजतानघाः)
13. M_1 V_{1-2} ^{0}ल्पकः LV ^{0}ल्पकैः, 14. M_1 M_4 V_{1-2} ^{0}पेक्षो
→ M_1 om. 96ab
15. D_1 V_{1-2} P_{1-4} चात्र

क्वचिद्धर्मः[1] क्वचित्क्रीडा[2] क्वचित्कामः क्वचिद्वधः ।
क्वचिद्धास्यं क्वचिद्युद्धं क्वचिदर्थः क्वचिच्छमः ।।९७।।

धर्मोऽ[3]धर्मप्रवृत्तानां कामः कामोप[4]सेविनाम् ।
निग्रहो दुर्विनीतानां विनीतानां दमक्रिया[5] ।।९८।।

[6]क्लीबानां धाष्ट्र्यजननमुत्साहः शूरमानिनाम् ।
अबुधानां[7] विबोधश्च वैदुष्यं[8] विदुषामपि ।।९९।।

ईश्वराणां विलासश्च[9] स्थैर्यं दुःखार्दितस्य च ।
अर्थोप[10]जीविनामर्थो धृति[11]रुद्विग्नचेतसाम् ।।१००।।

नानाभावोपसंपन्नं नानावस्थान्तरात्मकम् ।
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्[12] ।।१०१।।

उत्तमाधममध्यानां[13] नराणां कर्मसंश्रयम् ।
हितोपदेशजननं धृतिक्रीडासुखादिकृत् ।।१०२।।

दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम् ।
विश्राम[14]जननं लोके नाट्यमेतद्भविष्यति[15] ।।१०३।।

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम् ।
[16]सर्वोपदेशजननं नाट्यं लोके[17] भविष्यति ।।१०४।।

---

1. D_1 $P_{1\text{-}4}$ द्वन्द्वः, 2. D_1 M_1 $V_{1\text{-}2}$ $P_{1\text{-}4}$ transpose the feet b and d of the verse (See note)
→ After 97c, the text of M_1 ends.
3. The *avagraha* can be optional but is more in line with c.
4. D_1 $P_{1\text{-}4}$ कामार्थ^0, 5. LV मत्तानां दमनक्रिया ।, 6. $P_{1\text{-}4}$ क्लीबानामपि द्यूतां वा उत्साहेश्वरमानिनां (?)
7. $P_{1\text{-}4}$ अबोधानां, 8. $P_{1\text{-}4}$ वैदग्ध्यं, 9. V_2 विलासाश्च, 10. $P_{1\text{-}4}$ सर्वोपि, 11. $P_{1\text{-}4}$ यति^{0}, 12. $V_{1\text{-}2}$ नाट्यमेद्भविष्यति ।
→ V_1 om. V.103, V_2 transpose V.103 & V.104
13. $P_{1\text{-}4}$ समर्थानां, 14. D_1 $P_{1\text{-}4}$ विश्रान्ति^{0}, 15. LV नाट्यमेतन्मया कृतम् ।
16. D_1 $V_{1\text{-}2}$ $P_{1\text{-}4}$ लोकोप^0, 17. D_1 $V_{1\text{-}2}$ $P_{1\text{-}4}$ ^{0}मेतद्^{0} (for लोके)

सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च ।
अस्मिन्नाट्ये समेतानि तस्मादेतन्मया कृतम् ।।१०५।।

न तज्ज्ञानं[1] न तच्छिल्पं न सा विद्या न सा कला ।
न स योगो न तत्कर्म नाट्येऽस्मिन् यन्न[2] दृश्यते ।।१०६।।

तन्नात्र मन्युः कर्तव्यो भवद्भिरमरान्प्रति ।
[3]सप्तद्वीपानुकरणं नाट्ये ह्यस्मिन् प्रतिष्ठितम् ।।१०७।।

योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः ।
सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते ।।१०८।।

श्रुतिस्मृतिसदाचारपरिशेषार्थकल्पनम् ।[4]
विनोदजननं[5] लोके नाट्यमेतद्भविष्यति ।।१०९।।

कुरुध्वमत्र[6] विधिवद् यजनं[7] नाट्यमण्डपे ।
बलिप्रदानै[8]र्होमैश्च मन्त्रौषधिसमन्वितैः ।।११०

भोज्यै[9]र्भक्ष्यैश्च पानैश्च बलिः समुपकल्प्यताम् ।
मर्त्यलोकगताः सर्वे शुभां पूजामवाप्स्यथ[10] ।।१११।।

[11]अपूजयित्वा रङ्गं तु यः प्रेक्षां कल्पयिष्यति ।
तस्य तन्निष्फलं ज्ञानं तिर्यग्योनिं च यास्यति[12] ।।११२।।

→ Vv 105 & 106 transposed in LV.. V_2 P_{1-4} om. 105. D_1 has it after 107ab. V_1 has only ab.

1. P_{1-4} तच्छ्रुतं, **2.** D_1 P_{1-4} यन्नाटयेस्मिन्न, **3.** LV has 107ab as an extra line, reads ft.d as नाट्यमेतद्भविष्यति। D_1 M_1 P_{1-4} om. cd and replace it with येनानुकरणं नाट्यमेतत्तद्यन्मया कृतम् ।

→ After 107 LV, D_1 P_{1-4} insert
देवानामसुराणां च राज्ञामथ कुटुम्बिनाम् ।
ब्रह्मर्षीणां च विज्ञेयं नाट्यं वृत्तान्तदर्शकम् ।
(P_{1-4} have b as राज्ये लोकस्य चैव हि।)

4. LV D_1 V_{1-2} P_{1-4} have this line as वेदविद्येतिहासानामाख्यानपरिकल्पनम्।, **5.** D_1 P_{1-4} ^{0}करणं

→ After 109, D_1 V_{1-2} P_{1-4} ins. एतस्मिन्नन्तरे देवान्सर्वानाह पितामहः ।

6. V_{1-2} क्रियतामत्र P_{1-4} कुरु मंत्रस्य, **7.** D_1 P_{1-4} यजनं विधिवद्, **8.** V_{1-2} ^{0}प्रधानै^{0}, **9.** V_{1-2} जप्यै^{0}

10. V_{1-2} लोकेऽप्ययं वेदः...^{0}प्स्यति । **11.** D_1 V_{1-2} P_{1-4} ins. 113 cd here., **12.** V_2 ^{0}योनि भविष्यति ।

यज्ञेन संमितं ह्येतद्रङ्गदैवतपूजनम् ।
अपूजयित्वा रङ्गं तु नैव प्रेक्षां प्रवर्तयेत्[1] ।।११३।।

नर्तकोऽर्थपति[2]र्वापि यः पूजां न करिष्यति ।
न कारयिष्यत्यन्यैर्वा[3] प्राप्स्यत्यपचयं[4] तु सः ।।११४।।

यथाविधि यथादृष्टं[5] यस्तु पूजां करिष्यति ।
स लप्स्यते शुभानर्थान्स्वर्गलोकं च यास्यति ।।११५।।

एवमुक्त्वा तु भगवान्[6]द्रुहिणः सह दैवतैः ।
रङ्गपूजां कुरुष्वेति मामेवं समचोदयत् ।।११६।।

इति श्रीभारतीये नाट्यशास्त्रे नाट्योत्पत्ति[7]र्नाम प्रथमोऽध्यायः ।

---

1. D_1 V_{1-2} P_{1-4} replace this line as.
तस्मात्सर्वप्रयत्नेन कर्तव्यं नाट्ययोक्तृभिः ।
(V_{1-2} कर्तव्यं रङ्गपूजनम् ।)

2. P_{1-4} तत्र कोऽर्थपति^{0}, 3. V_{1-2} वाचैव (for अन्यैर्वा^{0}), 4. V_{1-2} ^{0}जयं, 5. V_{1-2} ^{0}शास्त्रं, 6. V_{1-2} एवं भवत्विति प्राह

7. V_{1-2} शास्त्रोत्पत्ति^{0}

द्वितीयोऽध्यायः ।

भरतस्य वचः श्रुत्वा प्रत्यूचुर्मुनयस्ततः[1] ।
भगवञ्श्रोतुमिच्छामो यजनं रङ्गसंश्रयम् ॥१॥

अथ वा याः क्रियास्तत्र लक्षणं यच्च पूजनम् ।
भविष्यद्भिर्नरैः कार्यं कथं त[2]न्नाट्यवेश्मनि ॥२॥

इहादिर्नाट्ययोगस्य[3] कीर्तितो नाट्यमण्डपः[4] ।
तस्मात्तस्यैव तावत्त्वं लक्षणं वक्तुमर्हसि ॥३॥

तेषां तु[5] वचनं श्रुत्वा मुनीनां भरतोऽब्रवीत् ।
लक्षणं पूजनं चैव श्रूयतां नाट्यवेश्मनः[6] ॥४॥

देवानां[7] मानसी सृष्टिर्गृहेषूपवनेषु च ।
नराणां यत्नतः कार्या लक्षणाभिहिताः क्रियाः ॥ ५॥

श्रूयतां तद्यथा यत्र[8] कर्तव्यो नाट्यमण्डपः ।
तस्य वास्तु च[9] पूजा च यथा योज्या प्रयत्नतः[10] ॥६॥

इह प्रेक्षागृहं दृष्ट्वा[11] धी[12]मता विश्वकर्मणा ।
त्रिविधः संनिवेशश्च शास्त्रतः परिकल्पितः ॥७॥

विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव हि[13] मण्डपः ।
तेषां त्रीणि प्रमाणानि ज्येष्ठं[14] मध्यं तथावरम्[15] ॥८॥

M_1 om. text upto 16d (upto यूका लिक्षा^{0})

1. V_{1-2} तदा, **2.** V_{1-2} वै नाट्य^0, **3.** V_{1-2} ^{0}वेदस्य, **4.** D_1 P_{1-4} नाट्यमंडप एव हि ।, **5.** D_1 नु, **6.** D_1 P_{1-4} ^{0}वेश्मनि
7. M_3 V_{1-2} दिव्यानां

→ After 5ab, D_1 P_{1-4} ins.
यथा भावाभिनिर्वर्त्याः सर्वे भावास्तु मानुषाः ।

8. V_2 तत्र, **9.** V_{1-2} देवत^0 (for वास्तु च), **10.** V_{1-2} च वास्तुषु, **11.** M_5 प्रेक्षागृहाणां तु, **12.** D_1 P_{1-4} श्री^{0}
13. D_1 P_{1-4} तु, **14.** M_{2-5} ज्येष्ठयं, **15.** V_{1-2} ^{0}परम्

प्रमाणमेषां निर्दिष्टं हस्तदण्डसमाश्रयम् ।
शतं चाष्टौ चतुःषष्टिर्हस्ता द्वात्रिंशदेव च[1] ॥९॥

अष्टाधिकं शतं ज्येष्ठं चतुःषष्टिस्तु मध्यमम् ।
कनीयस्तु तथा वेश्म हस्ता द्वात्रिंशदिष्यते[2] ॥१०॥

देवानां भवनं[3] ज्येष्ठं नृपाणां मध्यमं भवेत् ।
शेषाणां प्रकृतीनां तु कनीयः संविधीयते ॥११॥

प्रमाणं यच्च निर्दिष्टं लक्षणं विश्वकर्मणा[4] ।
प्रेक्षागृहाणां सर्वेषां तच्चैव हि निबोधत ॥१२॥

प्रेक्षागृहाणां सर्वेषां त्रिप्रकारो विधिः स्मृतः ।
विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव हि सम्मतः[5] ॥१३॥

कनीयस्तु कृतं[6] त्र्यस्रं चतुरस्रं तु मध्यमम् ।
ज्येष्ठं विकृष्टं विज्ञेयं नाट्यवेद[7]प्रयोक्तृभिः ॥१४॥

अणू रजश्च बालश्च लिक्षा यूका यवस्तथा ।
अङ्गुलं च तथा हस्तो[8] दण्डश्चैव[9] प्रकीर्तितः ॥१५॥

अणवोऽष्टौ रजः प्रोक्तं तान्यष्टौ बाल उच्यते ।
बालास्त्वष्टौ भवेल्लिक्षा यूका लिक्षाष्टकं भवेत् ॥१६॥

---

1. M_4 V_{1-2} (ft d) द्वात्रिंशच्चेति निश्चितः, **2.** V_{1-2} (ft d) द्वात्रिंशत्करमिष्यते, **3.** D_1 P_{1-4} तु भवेज् (for भवनं)

→ After 11, only LV ins

प्रेक्षागृहाणां सर्वेषां प्रशस्तं मध्यमं स्मृतम् ।

तत्र पाठ्यं च गेयं च सुखश्राव्यतरं भवेत् ।

Concordance of vv. 11-14 & App. passage

crit. version	LV
11ab	11cd
11cd	12ab
12ab	15cd
12cd	16ab
13ab	13cd
13cd	14ab
14ab	14cd
14cd	15ab
App. passage	
ab	12cd
cd	13ab

4. P_{1-4} कर्मणां, **5.** D_1 V_{1-2} P_{1-4} हि सम्मतः

6. D_1 V_{1-2} P_4 स्मृतं, **7.** D_1 P_{1-4} ^{0}वेश्म^0

8. M_4 V_{1-2} चैव हस्तश्च, **9.** V_{1-2} ^{0}श्च परि^{0}

यूकास्त्वष्टौ यवः प्रोक्तो[1] यवास्त्वष्टौ तथाङ्गुलम् ।
अङ्गुलानि तथा हस्तश्चतुर्विंशतिरुच्यते ।।१७।।

चतुर्हस्तो[2] भवेद्दण्डो निर्दिष्टस्तु प्रमाणतः ।
अनेनैव प्रमाणेन[3] वक्ष्याम्येषां विनिर्णयम् ।।१८।।

चतुःषष्टि[4]करान्कुर्याद्दीर्घत्वेन तु मण्डपम् ।
द्वात्रिंशदेव[5] विस्तारं[6] मर्त्यानां यो भवेदिह[7] ।।१९।।

अत ऊर्ध्वं न कर्तव्यः कर्तृभिर्नाट्यमण्डपः ।
यस्मादव्यक्तभावं हि तत्र नाट्यं व्रजेदिति[8] ।।२०।।

मण्डपे विप्रकृष्टे तु पाठ्य[8a]मुच्चरितस्वरम् ।
अनिःसरणधर्मत्वा[9]द्विस्वरत्वं व्रजेद् भृशं[9a] ।।२१।।

यश्चाप्यास्यगतो रागो[9b] नानाभावरसाश्रयः[10] ।
स वेश्मनः[11] प्रकृष्टत्वाद् व्रजेदव्यक्ततां पराम्[12] ।।२२।।

प्रेक्षागृहाणां सर्वेषां तस्मान्मध्यममिष्यते ।
यस्मात् पाठ्यं[13] च गेयं च सुखं[14] श्रव्यतरं भवेत् ।।।२३।।

देवानां मानसी सृष्टिर्गृहे[15]षूपवनेषु च ।
यत्नभावा[16]भिनिष्पन्नाः सर्वे भावा हि[17] मानुषाः ।।२४।।

---

1. D_1 P_{1-4} यवो ज्ञेयो, **2.** V_{1-2} हस्तं, **3.** At this point M_1 gives 21d-22ab, P_1 give 21abc, **4.** V_{1-2} P_{1-4} ^{0}षष्टि^{0}
5. M_1 V_{1-2} ^{0}शेन तु. D_1 ^{0}शतं च, **6.** D_1 P_{1-4} स्तारान्, **7.** M_5 V_{1-2} जयेदिह, **8.** V_{1-2} P_1 भवेदिति, **8a.** D_1 नाट्य
9. P_1 (also D_1 in margin) अनभिव्यक्तवर्णत्वात् ।, **9a.** D_1 P_{1-4} भृशं व्रजेत्, V_{1-2} भवेत्, **9b.** D_1 P_{1-4} भावो
10. M_1 V_{1-2} भावसृष्टिरसाश्रयः, **11.** D_1 P_{1-4} वेश्मविप्र^0, **12.** D_1 M_1 V_{1-2} परम्, **13.** V_{1-2} वाद्यं, **14.** D_1 P_{1-4} तत्र
→ After 23, LV, D_1 & P_{1-4} ins.
प्रेक्षागृहाणां सर्वेषां त्रिप्रकारो विधिः स्मृतः ।
विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव प्रयोक्तृभिः ।
कनीयस्तु स्मृतं त्र्यस्तं चतुरस्रं च मध्यम् ।
ज्येष्ठं विकृष्टं विज्ञेयं नाट्यवेश्म प्रयोक्तृभिः ।
15. P_{1-4} सृष्टिर्वने^{0}, **16.** M_4 ^{0}भावाद् विनि^{0}, **17.** V_{1-2} भावास्तु

तस्माद्देवकृतै[1]र्भावैर्न विस्पर्धेत मानुषः ।
मानुषस्य[2] तु गेहस्य[3] संप्रवक्ष्यामि लक्षणम् ।।२५।।

भूमेर्विभागं पूर्वं तु परीक्षेत प्रयोजकः[4] ।
ततो वास्तुप्रमाणेन[5] प्रारभेत शुभेच्छया ।।२६।।

समा स्थिरा तु[6] कठिना कृष्णा[7] गौरी च या[8] भवेत् ।
भूमिस्तत्र तु[9] कर्तव्यः कर्तृभिर्नाट्यमण्डपः ।।२७।।

प्रथमं शोधनं कृत्वा लाङ्गलेन समुत्कृषेत् ।
अस्थिकीलकपालानि तृणगुल्मांश्च शोधयेत् ।।२८।।

शोधयित्वा वसुमतीं प्रमाणं निर्दिशेत्ततः ।
[10]त्रीण्युत्तराणि सौम्यं च विशाखापि च रेवती ।।२९।।

हस्ततिष्यानुराधाश्च प्रशस्या[11] नाट्यकर्मणि ।
पुष्यनक्षत्रयोगेन[12] शुक्ल[13]सूत्रं प्रसारयेत् ।।३०।।

कार्पासं बाल्वकं[14] चापि मौञ्जं वाल्कलमेव[15] वा ।
सूत्रं बुधैस्तु कर्तव्यं यस्य च्छेदो न विद्यते ।।३१।।

अर्ध[16]च्छिन्ने भवेत्सूत्रे स्वामिनो मरणं ध्रुवम् ।
त्रिभाग[17]च्छिन्नया रज्ज्वा राष्ट्रकोपो विधीयते ।।३२।।

---

1. SV ^{0}द्वैवंकृतै^{0}, 2. V_1 मनुष्यस्य, 3. D_1 P_{1-4} गेयस्य, 4. $M_{1,3}$ V_{1-2} विचक्षणः, 5. $M_{1,4}$ V_{1-2} ^{0}प्रमाणं च
6. (for तु) $M_{2,4-5}$ ह्य^{0}, M_1 प्र^{0}, M_3 V_{1-2} च, 7. Only M_3 gives the reading कृष्णाऽगौरी!, 8. $M_{2,4-5}$ वा, 9. D_1 P_{1-4} तत्रैव
10. D_1 & P_{1-4} om. 29cd & 30ab, 11. M_1 V_{1-2} प्रशस्ता, 12. M_1 V_{1-2} तु, 13. D_1 P_{1-4} शुल्क^{0}
14. M_1 V_{1-2} बादरं D_1 P_{1-4} बाल्बजं
15. $M_{1,4}$ V_{1-2} वाल्कलं मौञ्ज^{0}, 16. SV अर्धा^{0}, 17. M_{2-5} त्रिभागा^{0}

छिन्नायां तु चतुर्भागे प्रयोक्तुर्नाश उच्यते ।
हस्त[1]प्रभ्रष्टया चापि[2] कश्चित्त्वपचयो भवेत् ।।३३।।

तस्मान्नित्यं प्रयत्नेन रज्जुग्रहणमिष्यते ।
कार्यं चैव प्रयत्नेन मानं नाट्यगृहस्य तु ।।३४।।

मुहूर्तेनानुकूलेन तिथ्याथ[3] करणेन च[4] ।
ब्राह्मणांस्तर्पयित्वा तु[5] [6]पुण्याहं वाचयेत्ततः ।।३५।।

शान्तितोयं ततो दत्त्वा तत्र[7] सूत्रं प्रसारयेत् ।
चतुःषष्टिकरान्कृत्वा द्विधा कुर्या[8]त्पुनश्च तान्[9] ।।३६।।

पृष्ठतो यो भवेद्भागो द्विधाभूतं भवेत्तु सः[10] ।
तस्यार्धेन विभागेन[11] रङ्गशीर्षं प्रकल्पयेत्[12] ।।३७।।

पश्चिमे तु[13] विभागेऽथ[14] नेपथ्यगृहमादिशेत् ।
विभज्य[15] भागान्विधिवद्यथावदनुपूर्वशः ।।३८।।

शुभे नक्षत्रयोगे तु[16] मण्डपस्य निवेशनम् ।
शङ्खदुन्दुभिनिर्घोषैर्मृदङ्गपण[17]वादिभिः ।।३९।।

सर्वातोद्यैः प्रणदितैः[18] स्थापनं कार्यमेव तु[19] ।
उत्सार्याणि त्वनिष्टानि पाषण्डा[20]श्रमिणस्तथा ।।४०।।

---

1. D_1 P_{1-4} हस्तात् V_1 हस्ते, **2.** D_1 M_1 P_{1-4} वापि, **3.** M_3 V_{1-2} च (for ^{0}थ), D_1 P_{1-4} सु^{0} (for ^{0}थ)
4. D_1 P_{1-4} च, **5.** V_{1-2} च, **6.** D_1 P_{1-4} om. 35d & 36a, **7.** D_1 P_{1-4} ततः, **8.** D_1 भूतं P_{1-4} भूतान्
9. D_1 P_{1-4} ^{0}स्ततः (for ^{0}श्च तान्,) **10.** D_1 P_{1-4} द्विधाभूतस्य तस्य तु; M_1 V_{1-2} ^{0}भूतो भवेच्च
11. D_1 P_{1-4} तस्याप्यर्धार्धभागेन M_5 सममर्धवि^{0}, **12.** M_1 V_{1-2} प्रयोजयेत्
13. D_1 P_{1-4} ^{0}(ऽ)थ, **14.** D_1 $M_{1,3}$ P_{1-2} पुनर्भागे, **15.** P_{1-4} विकल्प्य, **16.** D_1 P_{1-4} च
17. M_1 ^{0}वीण^0, **18.** M_1 V_{1-2} सर्वतूर्यनिनादैश्च D_1 P_{1-4} ^{0}प्रणुदितैः, (for last four letters)
19. M_1 V_{1-2} च, **20.** D_1 P_{1-4} पाषण्ड्या^{0}

काषायवसनाश्चैव विकलाश्चैव ये नराः ।
निशायां च बलिः कार्यो नानाभोजनसंश्रयः[1] ।।४१।।

गन्धपुष्पफलोपेतो दिशो दश समाश्रितः ।
पूर्वेण शुक्लान्नयुतो नीलः स्याद्दक्षिणेन च[2] ।।४२।।

पश्चिमेन बलिः पीतो रक्तश्चैवोत्तरेण तु ।
यादृशं दिशि यस्यां वा दैवतं परिकीर्तितम्[3] ।।४३।।

तादृशस्तत्र दातव्यो बलिर्मन्त्रपुरस्कृतः ।
स्थापने ब्राह्मणेभ्यश्च दातव्यं घृतपायसम्[4] ।।४४।।

मधुपर्कस्तथा राज्ञे क[5]र्तृभ्यश्च गुडौ[6]दनम् ।
नक्षत्रेण तु कर्तव्यं मूलेन स्थापनं बुधैः ।।४५।

मुहूर्तेनानुकूलेन तिथ्यासु[7] करणेषु[8] च ।
एवं तु स्थापनं कृत्वा भित्तिकर्म प्रयोजयेत् ।।।४६।।

भित्तिकर्मणि निर्वृत्ते स्तम्भानां स्थापनं ततः ।
तिथिनक्षत्रयोगेन शुभेन करणेन तु[9] ।।४७।।

[10]स्तम्भानां स्थापनं कार्यं रोहिण्यां श्रवणे तथा[11] ।
आचार्येण सुयुक्तेन[12] त्रिरात्रोपोषितेन च ।।४८।।

---

1. $M_{1,5}$ V_{1-2} ^{0}संयुतः, 2. D_1 P_{1-4} नीलश्चैव तु दक्षिणः M_1 V_{1-2} नीधानो (for नीलान्नो!)
3. $M_{1,3}$ V_{1-2} यस्यां यच्चाधिदैवं तु दिशि संपरिकीर्तितम् । 4. M_1 V_{1-2} दातव्यो घृ(ऽमृ)तपायसः, 5. M_1 भर्तृ^{0}
6. M_1 लौ V_1 P_{1-4} डो V_2 लो, 7. V_1 नु, 8. D_1 M_1 V_{1-2} P_{1-4} करणेन, 9. D_1 P_{1-4} च
10. D_1 P_{1-4} om. the whole line i.e. 48ab
11. M_1 रोहिण्या श्रवणेन वा V_{1-2} रोहिण्यां श्रवणेन वा, 12. D_1 P_{1-4} om. 48d and 49a upto स्थापनं

स्तम्भानां स्थापनं कार्यं प्राप्ते सूर्योदये शुभे[1] ।
प्रथमे ब्राह्मणस्तम्भे सर्पिःसर्षपसंयुते[2] ।।४९।।

सर्वशुक्लो विधिः कार्यो दद्यात्पायसमेव च[3] ।
ततश्च क्षत्रियस्तम्भे वस्त्रमाल्यानुलेनपनम् ।।५०।।

सर्वं रक्तं प्रदातव्यं द्विजेभ्यश्च गुडौ[4]दनम् ।
वैश्यस्तम्भे विधिः कार्यो दिग्भागे पश्चिमोत्तरे ।।५१।।

सर्वं पीतं[5] प्रदातव्यं द्विजेभ्यश्च घृताशनम्[6] ।
शूद्रस्तम्भे विधिः कार्यः सम्यक्पूर्वोत्तराश्रये ।।५२।।

नीलप्रायं प्रदातव्यं कृसरं[7] च द्विजाशनम् ।
पूर्वे तु[8] ब्राह्मणस्तम्भे शुक्लमाल्यानुलेपनम् ।।५३।।

निक्षिपेत्कनकं मूले कर्णाभरणसंश्रयम् ।
ताम्रं चैव[9] प्रदातव्यं स्तम्भे क्षत्रियसंज्ञके ।।५४।।

वैश्यस्तम्भस्य मूले तु रजतं संप्रदापयेत् ।
शूद्रस्तम्भस्य मूले[10] तु दद्यादायसमेव च ।।५५।।

सर्वेष्वेव[11] तु निक्षेप्यं[12] स्तम्भमूलेषु काञ्चनम्[13] ।
स्वस्तिपुण्याहघोषेण जयशब्देन चैव हि ।।५६।।

---

1. P_1 शुभं, **2.** D_1 M_1 $P_{1\text{-}4}$ संस्कृते, **3.** $M_{1,3}$ $V_{1\text{-}2}$ तु, **4.** M_4 घृतौ^{0} M_1 गुलौ^{0} V_2 गुलो^{0} V_1 $P_{1\text{-}4}$ गुडो^{0}
5. D_1 $P_{1\text{-}4}$ पीतं सर्वं, **6.** M_1 $V_{1\text{-}2}$ धृतोदनं $P_{1,4}$ ^{0}मृताशवं(?), **7.** D_1 $P_{1\text{-}4}$ प्रयत्नेन, **8.** D_1 $P_{1\text{-}4}$ पूर्वोक्त^0
9. D_1 $P_{1\text{-}4}$ चाधः M_1 $V_{1\text{-}2}$ चापि, **10.** $P_{1\text{-}4}$ शूद्रस्य स्तंभमूले **11.** D_1 M_1 $V_{1\text{-}2}$ $P_{1\text{-}4}$ शेषेष्वेव
12. $P_{1\text{-}4}$ निक्षिप्तं, **13.** $P_{1\text{-}4}$ तथैव च (for ^{0}षु काञ्चनम्)
→ $P_{1\text{-}4}$ om. 56cd - 68cd

स्तम्भानां स्थापनं कार्यं[1] पर्ण[2]मालापुरस्कृतम् ।
रत्नदानैः सगोदानैर्वस्त्रदानैरनल्पकैः ।।५७।।

ब्राह्मणांस्तर्पयि[3]त्वा तु स्तम्भमु[4]त्थापयेद्बुधः[5] ।
अचलं चाप्यकम्पं च[6] तथैवावलितं पुनः[7] ।।५८।।

स्तम्भस्योत्थापने सम्यग्दोषा ह्येते प्रकीर्तिताः ।
अवृष्टिरुक्ता चलने वलने मृत्युतो भयम् ।।५९।।

कम्पने परचक्रेभ्यो[8] भयं भवति[9] दारुणम् ।
दोषैरेतैर्विहीनं तु स्तम्भमुत्थापयेच्छिवम्[10] ।।६०।।

पवित्रे[11] ब्राह्मणस्तम्भे दातव्या दक्षिणा च गौः ।
शेषाणां स्थापने कार्यं भोजनं कर्तृसंश्रयम् ।।६१।।

मन्त्रपूतं[12] च तद्देयं नाट्याचार्येण धीमता ।
पुरोहितं नृपं चैव भोजयेन्मधुपायसम् ।।६२।।

कर्तृनपि तथा सर्वान् कृसरं लवणोत्तरम् ।
सर्वमेवं विधिं कृत्वा सर्वातोद्यैः प्रवादितैः ।।६३।।

अभिमन्त्र्य यथान्यायं स्तम्भानुत्थापयेच्छुचिः ।
यथाचलो गिरिर्मेरुर्हिमवांश्च यथाचलः ।।६४।।

---

1. D_1 कुर्यात्, 2. D_1 पुष्प^0 M_1 पद्म, 3. V_{1-2} स्थापयि^{0}, 4. D_1 M_1 V_{1-2} स्तम्भानु^{0}, 5. D_1 M_1 V_{1-2} ^{0}त्ततः
6. M_{2-5} अचलश्चाप्यकम्पश्च
7. M_1 ^{0}स्खलितं, 8. D_1 V_{1-2} ^{0}चक्रात्तु, 9. V_{1-2} वदति, 10. D_1 M_1 ^{0}च्छुभं, 11. D_1 M_1 V_{1-2} पवित्रं
12. $M_{1,4}$ V_{1-2} ^{0}पूर्वं, 13. D_1 M_1 V_{1-2} महाबलः

जयावहो नरेन्द्रस्य तथा[1] त्वमचलो भव[2] ।
स्तम्भद्वारं च भित्तिं च नेपथ्यगृहमेव च ।६५।।

एवमुत्थापयेत्तज्ज्ञो[3] विधिदृष्टेन कर्मणा ।
रङ्गपीठस्य पार्श्वे[4] च कर्तव्या मत्तवारणी[5] ।।६६।।

चतुःस्तम्भसमायुक्ता रङ्गपीठप्रमाणतः ।
अध्यर्धहस्तोत्सेधेन कर्तव्या मत्तवारणी[6] ।।६७।।

उत्सेधेन तयो[7]स्तुल्यं कर्तव्यं रङ्गमण्डपम्[8] ।
तस्यां माल्यं[9] च धूपं च गन्धं वस्त्रं[10] तथैव च ।।६८।।

नाना[11]वर्णानि देयानि तथा भूतप्रियो बलिः[12] ।
[13]आयसं तत्र दातव्यं स्तम्भानां कुशलैरधः[14] ।।६९।।

भोजने कृसरं चैव दातव्यं ब्राह्मणाशनम् ।
एवं विधिपुरस्कारैः कर्तव्या मत्तवारणी[15] ।।७०।।

रङ्गपीठं ततः कार्यं विधिदृष्टेन कर्मणा ।
रङ्गशीर्षं तु कर्तव्यं षड्दारुकसमन्वितम् ।।७१।।

कार्यं द्वारद्वयं चात्र नेपथ्यगृहकस्य तु[16] ।
पूरणे मृत्तिका चात्र कृष्णा देया प्रयत्नतः ।।७२।।

---

1. V_{1-2} यथा, **2.** V_{1-2} वह, **3.** D_1 प्राज्ञो, **4.** M_1 V_{1-2} पश्चात्तु, **5.** $M_{2, 4-5}$ मत्तवारिणी, **6.** M_1 मत्तवारिणी, **7.** D_1 तया तुल्यं, **8.** $M_{2, 4}$ ^{0}मण्डलं
9. M_1 V_{1-2} वास्त्रं, **10.** M_1 V_{1-2} माल्यं, **11.** P_{1-4} मनो^{0}, **12.** P_{1-4} बलिं, **13.** M_{1-5} V_{1-2} पायसं, **14.** M_{2-5} कुशलाया तु।
15. $M_{1-3, 5}$ ^{0}वारिणी P_{1-4} ^{0}वारुणी, **16.** D_1 P_{1-4} च

[1]लाङ्गलेन समुत्कृष्य निर्लोष्टतृणशर्करम्[2] ।
लाङ्गले शुद्धवर्णौ तु धुर्यौ योज्यौ प्रयत्नतः ।।७३।।

कर्तारः पुरुषाश्चात्र[3] येऽङ्गदोषविवर्जिताः ।
अहीनाङ्गैश्च वोढव्या मृत्तिकापिटकै[4]र्नवैः ।।७४।।

एवंविधैश्च कर्तव्यं रङ्गशीर्षं प्रयत्नतः ।
कूर्मपृष्ठं न कर्तव्यं मत्स्यपृष्ठं तथैव च ।।७५।।

शुद्धादर्शतलाकारं[5] रङ्गपीठं[6] प्रशस्यते ।
रत्नानि चात्र देयानि पूर्वं वज्रं विचक्षणैः ।।७६।।

वैदूर्यं दक्षिणे चैव[7] स्फटिकं पश्चिमे तथा ।
प्रवालमुत्तरे चैव मध्ये तु कनकं भवेत् ।।७७।।

एवं रङ्गशिरः कृत्वा दारुकर्म प्रयोजयेत्[8] ।
ऊहप्रत्यूहसंयुक्तं नानाशिल्पप्रयोजितम् ।।७८।।

नानासंजवनोपेतं[9] बहुव्यालोपशोभितम् ।
[10]भवेयुश्चात्र विन्यस्ता विविधाः सालभञ्जिकाः ।।७९।।

निर्यूहकुहरोपेतं नानाग्रथितवेदिकम् ।
नानाविन्यासंयुक्तं चित्र[11]जालगवाक्षकम् ।।८०।।

---

1. D_1 om. 73ab, **2.** P_{1-4} कर्करं, **3.** M_1 V_{1-2} ^{0}स्तत्र, **4.** M_3 V_{1-2} पीठकै^{0}, **5.** P_{1-4} ^{0}तलप्रख्यं, **6.** M_1 शीर्षं

7. D_1 P_{1-4} पार्श्वे, **8.** $M_{1,4}$ V_{1-2} प्रवर्तयेत्, **9.** P_{1-4} नानभंजवरोपेतं

10. M_1 V_{1-2} om. 79cd-81cd. D_1 P_{1-4} read 79cd as ससाल(LV अट्टाल)भञ्जिकाभिश्च समन्तात् समलङ्कृतम् ।।

11. P_{1-4} यन्त्र^0

सुपीठधारणीयुक्तं कपोतालीसमाकुलम् ।
नानाकुट्टिमविन्यस्तैः स्तम्भैश्चाप्यु[1]पशोभितम् ।।८१।।

एवं काष्ठ[2]विधिं कृत्वा भित्तिकर्म प्रयोजयेत्[3] ।
स्तम्भं वा नागदन्तं वा वातायनमथापि वा ।।८२।।

कोणं वा[4] सप्रतिद्वारं द्वार[5]विद्धं न कारयेत् ।
कार्यः शैलगुहाकारो द्विभूमि[6]र्नाट्यमण्डपः ।।८३।।

मन्दवातायनोपेतो निर्वातो धीरशब्दभाक्[7] ।
तस्मान्निवातः कर्तव्यः[8] कर्तृभिर्नाट्यमण्डपः ।।८४।।

गाम्भीर्यं मुखरत्वं च[9] कुतपस्य भवेदिति[10] ।
भित्तिकर्मविधिं कृत्वा भित्तिलेपं प्रदापयेत् ।।८५।।

सुधाकर्म बहिस्तस्य[11] विधातव्यं[12] प्रयत्नतः ।
भित्तिष्वथ वि[13]लिप्तासु परिमृष्टासु सर्वतः ।।८६।।

समासु जातशोभासु चित्रकर्म प्रवर्तयेत्[14] ।
चित्रकर्मणि चालेख्याः पुरुषाः स्त्रीजनास्तथा ।।८७।।

लताबन्धाश्च कर्तव्याश्चरितं चात्मभोगजम् ।
एवं विकृष्टं कर्तव्यं नाट्यवेश्म प्रयोक्तृभिः ।।८८।।

---

1. D_1 ^{0}श्चानुप^0, 2. M_{2-4} नाद^0(?), 3. $M_{1,3}$ V_{1-2} प्रवर्तयेत्, 4. P_{1-4} कार्ष्णवाय^0, 5. M_1 V_{1-2} दारु^{0}
6. M_1 विभूमि^{0} V_{1-2} विभूति^{0}, 7. D_1 P_{1-4} ^{0}वान्, 8. $M_{2-3,5}$ निपातं कर्तव्यं
9. D_1 P_{1-4} गंभीरस्वरता येन M_1 V_{1-2} गांभीर्यं सुस्वरत्वं च, 10. D_1 P_{1-4} भविष्यति
11. P_{1-4} विधिस्तस्य $M_{1,3}$ V_{1-2} तथैवास्य, 12. $M_{1,3}$ V_{1-2} कुर्याद्बाह्यं, 13. V_{1-2} भित्तिष्वपि च, 14. D_1 P_{1-4} प्रयोजयेत्

अतः परं प्र[1]वक्ष्यामि चतुरस्रस्य लक्षणम् ।
समन्ततस्तु[2] कर्तव्या हस्ता द्वात्रिंशदेव तु ।।८९।।

शुभभूमिविभागस्थो नाट्यज्ञैर्नाट्यमण्डपः ।
यो विधिः पूर्वमुक्तस्तु लक्षणं मङ्गलानि[3] च ।।९०।।

[4]विकृष्टे तान्यशेषाणि चतुरस्रेऽपि कारयेत् ।
चतुरस्रं समं कृत्वा सूत्रेण प्रविभज्य च ।।९१।।

बाह्यतः सर्वतः कार्या भित्तिः श्लिष्टेष्टका दृढा ।
तत्राभ्यन्तरतः कार्या रङ्गपीठे यथादिशम्[5] ।।९२।।

दश प्रयोक्तृभिः स्तम्भाः शक्ता[6] मण्डपधारणे[7] ।
स्तम्भानां बाह्यतश्चापि[8] सोपानाकृति पीठकम् ।।९३।।

इष्टकादारुभिः कार्यं प्रेक्षकाणां निवेशनम् ।
हस्तप्रमाणैरुत्सेधैर्भूमिभागसमुत्थितैः ।।९४।।

रङ्गपीठावलोक्यं[9] च कुर्यादासनजं[10] विधिम् ।
षडन्यानन्तरे चैव[11] पुनः स्तम्भान्यथादिशम् ।।९५।।

विधिना स्थापयेत्तज्ज्ञो[12] दृढान्मण्डपधारणे ।
अष्टौ स्तम्भान्पुनश्चैव तेषामुपरि कल्पयेत्[13] ।।९६।।

---

1. D_1 $P_{1\text{-}4}$ पुनरेव हि, **2.** D_1 $P_{1\text{-}4}$ ^{0}श्च, **3.** $V_{1\text{-}2}$ मण्डलानि
4. M_1 $V_{1\text{-}2}$ (D_1 in margin) replace the line 91ab as चतुरस्रस्य तान्येव कारयेन्नाट्यवेश्मनः।
5. D_1 ^{0}पीठोपरि स्थिताः $P_{1\text{-}4}$ ^{0}पीठं परिस्थिताः, **6.** D_1 $P_{1\text{-}4}$ शस्ता, **7.** D_1 $P_{1\text{-}4}$ ^{0}लक्षणे, **8.** M_1 $V_{1\text{-}2}$ ^{0}तः स्थाप्यं
9. $V_{1\text{-}4}$ ^{0}पीठविलोक्यं च, **10.** M_1 $V_{1\text{-}2}$ ^{0}दासनिकं, **11.** M_1 $V_{1\text{-}2}$ ^{0}न्यान् सुन्दरान् दद्यात्, **12.** M_1 $V_{1\text{-}2}$ प्राज्ञो
13. M_1 $V_{1\text{-}2}$ कारयेत्

[1]विद्धास्यमष्टहस्तं च पीठं तेषु ततो न्यसेत् ।
तत्र स्तम्भाः प्रदातव्यास्तज्ज्ञैर्मण्डपधारणे ।।९७।।

धारणीधारणा[2]स्ते च शाल[3]स्त्रीभिरलंकृताः ।
[4]नेपथ्यगृहकं चैव ततः कार्यं प्रयोक्तृभिः[5] ।।९८।।

द्वारं चैकं भवेत्तस्य[6] रङ्गपीठप्रवेशनम्[7] ।
जनप्रवेशनं चान्यदा[8]भिमुख्येन कारयेत् ।।९९।।

रङ्गस्याभिमुखं कार्यं द्वितीयं द्वारमेव तु ।
अष्टहस्तं तु कर्तव्यं रङ्गपीठं प्रमाणतः ।।१००।।

चतुरस्रं[9] समतलं वेदिकासमलंकृतम् ।
पूर्वप्रमाणनिर्दिष्टा कर्तव्या मत्तवारणी[10] ।।१०१।।

चतुःस्तम्भसमायुक्ता वेदिकायास्तु पार्श्वतः ।
समुन्नतं समं चैव रङ्गपीठं[11] तु कारयेत् ।।१०२

विकृष्टे तू[12]न्नतं कार्यं चतुरस्रे[13] समं तथा ।
[14]एवमेतेन विधिना चतुरस्रं गृहं भवेत् ।।१०३।।

[15]अतः परं प्रवक्ष्यामि त्र्यस्रगेहस्य लक्षणम् ।
त्र्यस्रं त्रिकोणं कर्तव्यं नाट्यवेश्म प्रयोक्तृभिः ।।१०४।।

→ **1.** $M_{1,3}$ V_{1-2} replace the whole line 97ab as संस्थाप्यं च पुनः पीठमष्टहस्तप्रमाणतः ।
2. V_{1-2} धारिणीधारिता, **3.** P_{2-3} शील^0, **4.** P_{2-3} om. the two lines i.e. 98cd & 99ab, **5.** D_1 $P_{1,4}$ प्रयत्नतः
6. D_1 $P_{1,4}$ तस्य, **7.** $M_{1,4}$ V_{1-2} ^{0}प्रवेशने $P_{1,4}$ पीठं प्रयत्नतः, **8.** M_1 V_{1-2} ^{0}शने चैवमाभि^{0}
→ After 100ab, M_1 inserts the three lines 103cd-104cd. These lines are omitted in V_{1-2}
9. D_1 P_{1-4} ^{0}रस्रे, **10.** $M_{2,4-5}$ ^{0}वारिणी, **11.** D_1 P_{1-4} शीर्षं, **12.** M_1 V_{1-2} ^{0}(ऽ)प्यु^{0}, P_{1-4} ^{0}रु^{0}, **13.** P_{1-4} ^{0}रस्रं
14. See above after fn. (8)
15. $M_{1,4}$ replace this line 104ab as त्र्यस्रस्य मण्डपस्यापि संप्रवक्ष्यामि लक्षणम् ।

मध्ये त्रिकोणमेवास्य रङ्गपीठं तु[1] कारयेत् ।
द्वारमेकेन[2] कोणेन कर्तव्यं तु प्रवेशने[3] ।
द्वितीयं चैव कर्तव्यं रङ्गपीठस्य पृष्ठतः ॥१०५॥

विधिर्यश्च[4]तुरस्रस्य भित्तिस्तम्भसमाश्रयः[5] ।
स तु सर्वः प्रयोक्तव्यस्त्र्यस्रस्यापि प्रयोक्तृभिः ॥१०६॥

एवमेतेन विधिना कार्यं[6] नाट्यगृहं[6] बुधैः ।
पुनरेषां[7] प्रवक्ष्यामि पूजामेव[8] यथाविधि ॥१०७॥

इति श्रीभारतीये नाट्यशास्त्रे प्रेक्षागृहलक्षणं[9] नाम
द्वितीयोऽध्यायः ।

---

1. M_1 V_{1-2} प्र^0, 2. D_1 P_{1-4} द्वारं तेनैव V_{1-2} वामेन केन (?), 3. M_1 प्रकाशने D_1 P_{1-4} तस्य वेश्मनः (for तु प्रवेशने)
4. M_1 द्वितीयश्चतु^{0} P_{1-4} विधेयश्चतु^{0}, 5. M_1 समन्वितः, 6. D_1 P_{1-4} कार्या नाट्यगृहा, 7. M_1 V_{1-2} अत ऊर्ध्वं
8. $M_{1,3}$ V_{1-2} ^{0}मेषां, 9. D_1 om.; P_{1-4} मंडपविधानं

षष्ठोऽध्यायः ।

पूर्वरङ्गविधिं श्रुत्वा पुनराहुर्महत्तमाः ।
[1]मुनयो भरतं सर्वे प्रश्नान् पञ्च[2]ब्रवीहि नः[3] ॥१॥

ये रसा इति पठ्यन्ते नाट्ये नाट्यविचक्षणैः ।
रसत्वं केन वै तेषामेतदाख्यातुमर्हसि ॥२॥

भावाश्चैव[4] कथं[5] प्रोक्ताः किं वा ते भावयन्ति हि ।
संग्रहं कारिकां[6] चैव निरुक्तं चैव तत्त्वतः[7] ॥३॥

[8]तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः ।
प्रत्युवाच पुनर्वाक्यं रसभावविकल्पनम् ॥४॥

न शक्यमिह नाट्यस्य गन्तुमन्तं कथंचन ।
[9]तस्माद्बहुत्वाज्ज्ञानानां शिल्पानां चा[10]प्यनन्ततः ॥५॥

एकस्यापि न वै शक्यमन्तं ज्ञानार्णवस्य हि ।
गन्तुं किमुत सर्वेषां[11] ज्ञानानामर्थतत्त्वतः ॥६॥

किंत्वल्पसूत्रगूढा[12]र्थमनुमानप्रसाधकम् ।
नाट्यस्यास्य प्रवक्ष्यामि रसभावादिसंग्रहम् ॥७॥

विस्तरेणो[13]पदिष्टानामर्थानां सूत्रभाष्ययोः ।
निबन्धो[14] यः समासेन संग्रहं तं विदुर्बुधाः ॥८॥

---

1. D_1 V_1 P_{1-4} भरतं मुनयः V_2 मुनयो महत्तमाः (hypermetric), **2.** M_1 V_2 पञ्च प्रश्नान्
3. for ft d, P_{1-4} प्रश्नमह्यं वदस्व नः LV ^{0}श्चाभिधत्स्व नः, **4.** D_1 P_{1-4} ^{0}श्चापि, **5.** M_1 V_2 हि ये, **6.** D_1 M_1 ^{0}काश्चैव
7. V_2 च यथाक्रमम्, **8.** V_2 misses the whole verse 4
→ After verse 4, D_1 $M_{1,3}$ V_1 P_{1-4} ins.
अहं वः कथयिष्यामि निखिलेन तपोधनाः । संग्रहं कारिकां चैव निरुक्तं च यथाक्रमम् । (See note)
9. D_1 V_{1-2} P_{1-4} कस्मात्, **10.** D_1 V_1 P_{1-4} वा^{0}, **11.** D_1 V_1 P_{1-4} किं पुनरन्येषां V_2 पुनस्सर्वेषां
12. D_1 V_1 P_{1-4} ^{0}ग्रन्था^{0}, **13.** P_{1-4} विस्तारणो^{0}, **14.** M_1 V_2 निबद्धो

रसा भावास्त्व[1]भिनया धर्मी वृत्तिप्रवृत्तयः ।
सिद्धिः स्वरास्तथातोद्यं गानं रङ्गश्च संग्रहः ॥९॥

अल्पाभिधानेनार्थो यः समासेनोच्यते बुधैः ।
सूत्रतः सा नु मन्तव्या[2] कारिकार्थप्रदर्शिनी[3] ॥१०॥

नानानामाश्रयोत्पन्नं निघण्टुं निगमान्वितम् ।
धात्वर्थहेतुसंयुक्तं नानासिद्धान्तसाधितम् ॥११॥

स्थापितोऽर्थो भवेद्यत्र समासेनार्थसूचकः ।
धात्वर्थवचनेनेह निरुक्तं तत्प्रचक्षते[4] ॥१२॥

संग्रहो यो मया प्रोक्तः समासेन द्विजोत्तमाः ।
विस्तरं तस्य वक्ष्यामि सनिरुक्तं सकारिकम् ॥१३॥

श्रृङ्गारहास्यकरुणा रौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञौ[5] चेत्यष्टौ नाट्ये रसाः स्मृताः ॥१४॥

एते ह्यष्टौ रसाः प्रोक्ता द्रुहिणेन महात्मना ।
पुनश्च भावान्वक्ष्यामि स्थायिसंचारिसत्त्वजान् ॥१५॥

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयं चैव[6] स्थायिभावाः प्रकीर्तिताः ॥१६॥

---

1. D_1 V_{1-2} P_{1-4} ह्य^0, 2. M_1 V_{1-2} तु विज्ञेया, 3. V_2 प्रयोगिनी, 4. M_1 V_2 तद्विदुर्बुधाः, 5. M_1 ^{0}ज्ञेन P_{1-4} ज्ञाश्चे^{0}
6. D_1 M_1 V_{1-2} P_{1-4} ^{0}यश्चेति

निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ।।१७।।

व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ।।१८।।

सुप्तं वि[1]बोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिरथोन्मादस्तथा मरणमेव च ।।१९।।

त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ।।२०।।

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभे[2]दोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ।।२१।।

आङ्गिको वाचिकश्चैव आहार्यः सात्त्विकस्तथा ।
चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः[3] ।।२२।।

लोकधर्मी नाट्यधर्मी धर्मी तु[4] द्विविधः स्मृतः ।
भारती सात्वती चैव [5]कैशिक्यारभटी तथा ।।२३।।

चतस्रो वृतयो ह्येता कैशिक्या सह कीर्तिताः[6] ।
आवन्ती दाक्षिणात्या च तथा चैवोड्र[6]मागधी ।।२४।।

---

1. M_1 V_2 प्रबोधो, 2. M_{1-5} V_2 ^{0}सादो (See note), 3. for ft d. D_1 P_{1-4} येषु नाट्यं प्रतिष्ठितं, 4. D_1 V_{1-2} P_{1-4} धर्मीति
5. for ft d D_1 V_{1-2} P_{1-4} यासु नाट्यं प्रतिष्ठितम् (See note), 6. D_1 P_{1-4} चैवांध्र^0 M_1 V_2 वोष्ट्र

प्राश्चाल[1]मध्यमा चैव[2] ज्ञेया नाट्य[3]प्रवृत्तयः ।
दैविकी मानुषी चैव तत्सिद्धिर्द्विविधा भवेत्[4] ।।२५।।

शारीराश्चैव वैणाश्च[5] सप्त षड्जादयः स्वराः ।
ततं चैवावनद्धं च घनं सुषिरमेव[6] च ।।२६।।

चतुर्विधं च[7] विज्ञेयमातोद्यं लक्षणान्वितम् ।
ततं तन्त्रीगतं ज्ञेयमवनद्धं तु पौष्करम् ।।२७।।

घनस्तु तालो विज्ञेयः सुषिरो[8] वंश एव च ।
प्रवेशाक्षेपनि[9]ष्क्रामप्रासादिक[10]मथान्तरम् ।।२८।।

गानं पञ्चविधं विद्याद्[11] ध्रुवायोगसमन्वितम् ।
चतुरस्रो विकृष्टश्च रङ्गस्त्र्यस्रश्च कीर्तितः ।।२९।।

एवमेषोऽल्पसूत्रार्थो व्यादिष्टो[12] नाट्यसंग्रहः ।
अतः परं प्रवक्ष्यामि सूत्रग्रन्थविकल्पनम् ।।३०।।

तत्र रसानेव तावदादावभिधास्यामः[13] । नहि रसादृते कश्चिदप्यर्थः[14] प्रवर्तत इति ।

[15]विभावानुभाव[16]व्यभिचारिसंयोगाद्रसनिष्पत्तिः ।

को वा[17] दृष्टान्तः । इति चेत् उच्यते[18] । यथा हि नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिर्भवति[19], तथा नानाभावोपगमाद्रसनिष्पत्तिर्भवति[20] । यथा हि गुडादि[21]भिर्द्रव्यैर्व्यञ्जनैरोषधिभिश्च षड्रसा[22] निर्वर्त्यन्ते, एवं नानाभावोपहिता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति । अत्राह[23]–रस इति कः पदार्थः । [24]उच्यते । आस्वाद्यत्वात् । कथमास्वाद्यो रसः[25] । यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषा हर्षादींश्चाप्यधि[26]गच्छन्ति तथा नानाभावाभिनयव्यञ्जितान् वागङ्गस[27]त्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षकाः, हर्षादीनधिगच्छन्ति[28] तस्मान्नाट्यरसा इति[29] व्याख्याताः । [30]अत्रानुवंश्यौ श्लोकौ भवतः–

---

1. D_1 P_{1-4} पंचाल M_{1-5} V_2 पांचाली, **2.** D_1 P_{1-4} चेति, **3.** D_1 P_{1-4} विज्ञेयास्तु (for ज्ञेया नाट्य^0)
4. for ft d, D_1 P_{1-4} सिद्धिः स्याद्द्विविधैव तु। (M_2 M_5 ^{0}र्विविधा!), **5.** for ft a, M_1 M_5 V_2 शारीरा वैणवाश्चैव
→ After 26b, V_1 ins. निषाधर्षभगन्धारमध्यपञ्चमधैवताः । **6.** D_1 P_{1-4} शुखिर^0 (See note),
7. P_{1-4} तु, **8.** D_1 P_{1-4} सुखिरो **9.** D_1 P_{1-4} ^{0}निः^{0}, **10.** M_1 V_2 प्रावेशिक, **11.** D_1 M_1 V_2 P_{1-4} ज्ञेयं
→ V1-2 ins. 26ab after 29ab.
12. D_1 V_1 P_{1-4} निर्दिष्टो, **13.** D_1 V_1 P_{1-4} व्याख्यास्यामः । **14.** (See note), **15.** D_1 V_1 P_{1-4} add तत्र
16. P_{1-4} ins. स्य here!, **17.** D_1 V_1 P_{1-4} om. वा, **18.** D_1 V_1 P_{1-4} अत्राह (for इतिचेदुच्यते)
19. D_1 M_1 V_{1-2} P_{1-4} om. भवति, **20.** D_1 om. तथा… भवति ।, **21.** M_{2-4} शुद्धादि^{0}
22. D_1 M_2 V_1 P_{1-4} षाडवादयो रसा (see note), **23.** M_1 V_2 ऋषय ऊचुः(!) (see note), **24.** M_1 अत्रो^{0}
25. M_1 V_2 किमिति चेत् । अत्रोच्यते । (Cp.fn.23), **26.** P_{1-4} हर्षादिव्याधि^{0} (see note)
27. P_{1-4} ^{0}सा^{0} (under influence of the term सात्त्विक?)
28. D_1 M_1 V_2 om. this sub-clause, end sentence with प्रेक्षकः । The context can supply the sense by implication, **29.** D_1 V_1 P_{1-4} इत्यभि^{0} V_2 स्मृता इति, **30.** D_1 ins. अपि च

यथा बहुद्रव्ययुतै[1]र्व्यञ्जनैर्बहुभिर्युतम्[2] ।
आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः ।।३१।।

भावाभिनयसंबद्धा[3]न्स्थायिभावांस्तथा बुधाः ।
आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः ।।३२।।

अत्राह – किं रसेभ्यो भावानामभि[4]निर्वृति[5]रुताहो भावेभ्यो रसानामिति । [6]अत्र केषांचिन्मतं परस्परसंबन्धादेषामभिनिर्वृतिरिति । एतन्न[7] । कस्मादुच्यते[8] । दृश्यते हि भावेभ्यो रसानामभिनिर्वृत्तिर्न न रसेभ्यो भावानामिति । भवन्ति चात्र श्लोकाः

नानाभिनयसंबद्धान्भावयन्ति रसानिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः ।।३३।।

[9]नानाद्रव्यैर्बहुविधैर्व्यञ्जनं भाव्यते यथा[10] ।
एवं भावा भावयन्ति रसानभिनयैस्सदा[11] ।।३४।।

न भावहीनोऽस्ति रसो न भावो[12] रसवर्जितः ।
परस्परकृता सिद्धिस्तयोरभिनये भवेत् ।।३५।।

व्यञ्जनौषधिसंयोगो[13] यथान्नं स्वादुतां नयेत्[14] ।
एवं भावा रसाश्चैव भावयन्ति परस्परम् ।।३६।।

यथा बीजाद्भवेद्वृक्षो[15] वृक्षात्पुष्पं फलं यथा ।
तथा मूलं रसाः सर्वे तेभ्यो[16] भावा व्यवस्थिताः ।।३७।।

---

1. M_1 V_2 व्युक्तै^{0}, 2. V_2 युक्तं, 3. M_1 V_2 ^{0}संयुक्तां, 4. D_1 $P_{1\text{-}4}$ om. अभि^{0}
5. V_2 om. the prose from रुताहो, has only रिति तत्र श्लोकाः, 6. D_1 M_1 उच्यते (for अत्र) $P_{1\text{-}4}$ om. अत्र…मतं
7. $P_{1\text{-}4}$ om. एतन्न, 8. D_1 $P_{1\text{-}4}$ om. the sentence, 9. $P_{1\text{-}4}$ om. the whole verse, 10. D_1 भावयेद्यथा
11. D_1 M_1 $V_{1\text{-}2}$ ^{0}यैस्सह 12. M_1 V_2 न रसो भाव^0 (obviously a mistake), 13. V_2 ^{0}गाद्यथा^{0}
14. M_1 V_2 ^{0}ता भवेत्, 15. $P_{1\text{-}4}$ ^{0}द्भाववृक्षो, 16. D_1 M_3 $P_{1\text{-}4}$ ततो M_1 V_2 तेषु

एव[1]मेते स्थायिनो भावा रससंज्ञा पर्यव[2]गन्तव्याः । एषां रसानामुत्पत्तिवर्णदैवत[3]निदर्शनान्यभिव्याख्यास्यामः-तेषामुत्पत्तिहेतवश्चत्वारो रसाः । तद्यथा शृङ्गारो रौद्रो वीरो बीभत्स इति ।

अत्र-

शृङ्गाराद्धि भवेद्धास्यो रौद्रात्तु[4] करुणो रसः ।
[5]वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः ॥३८॥

शृङ्गारानुकृतिर्या तु स हास्य इति कीर्तितः[6] ।
[7]रौद्रस्यापि च यत्कर्म स ज्ञेयः करुणो रसः ॥३९॥

वीरस्यापि च यत्कर्म सोऽद्भुतः परिकीर्तितः ।
बीभत्सदर्शनं यत्र ज्ञेयः स तु भयानकः ॥४०॥

अथः वर्णाः

श्यामो भवेत्तु[8] शृङ्गारः सितो हास्यः प्रकीर्तितः ।
कपोतः करुणश्चैव रक्तो रौद्रः प्रकीर्तितः ॥४१॥

गौरो वीरस्तु विज्ञेयः कृष्णश्चैव[9] भयानकः ।
नीलवर्णस्तु बीभत्सः पीतश्चैवाद्भुतः स्मृतः[10] ॥४२॥

अथ दैवतानि[11]

शृङ्गारो विष्णुदैवत्यो[12] हास्यः प्रमथदैवतः ।
रौद्रो रुद्राधिदैवश्चः[13] करुणो यमदैवतः ॥४३॥

---

1. $M_{2\text{-}5}$ भाव^0 (see note), **2.** Unni reads प्रत्यव^0

3. M_1 V_1 read रसा... दैवत etc. thus: रसानां विभावव्यभिचारिसंयुक्तानामुपपत्तौ दैवतानि दर्शनान्यभि^{0}

4. D_1 $P_{1\text{-}4}$ ^{0}च्च, **5.** V_2 om. 38cd and whole of 39, **6.** D_1 $P_{1\text{-}4}$ हास्यस्तु प्रकी^{0} $M_{1,3,5}$ संज्ञिताः (for कीर्तितः)

7. D_1 $V_{1\text{-}2}$ $P_{1\text{-}4}$ ^{0}स्यैव, **8.** D_1 V_1 $P_{1\text{-}4}$ भवति, **9.** V_2 ^{0}श्चापि, **10.** P_4 adds this verse 42 in the mragin.

11. D_1 $P_{1\text{-}4}$ अथाधिदैवतानि, **12.** D_1 $P_{1\text{-}4}$ ^{0}देवस्तु, **13.** D_1 $P_{1\text{-}4}$ ^{0}देवस्तु

[1]वीरो महेन्द्रदैवत्यः[2] अद्भुतो ब्रह्मदैवतः ।
बीभत्सस्य महाकालः कालदेवो भयानकः ।।४४।।

एवमेतेषा[3]मुत्पत्तिवर्णदेवतान्यभिव्याख्यातानि । इदानीं विभावानुभावव्यभिचारिसंयुक्तानां लक्षणनिदर्शनान्यभिव्याख्यास्यामः, स्थायिभावांश्च रसत्वमुपनेष्यामः[4] ।

तत्र शृङ्गारो नाम रतिस्थायिभावप्रभव हृद्यो[5]ज्ज्वलवेषस्वभावः[6] । यत्किंचित्[7] शुचि मेध्यं ज्वलत्[8] दर्शनीयं वा[9] तच्छृङ्गारेणोपमीयते । यस्तावदुज्ज्वलवेषः स शृङ्गारवानित्युच्यते । यथा च गोत्रकुलाचारोत्पन्नान्याप्तोपदेशसिद्धानि पुंसां नामानि भवन्ति तथैवैषां रसानां भावानां च नाट्याश्रितानां चार्थानामाचारोत्पन्नान्याप्तोपदेशसिद्धानि नामानि । एवमेष आचारसिद्धो हृद्योज्ज्वलवेषात्मकत्वाच्छृङ्गारो रसः । स च स्त्रीपुंस[10]हेतुक उत्तमयुवप्रकृतिः । तस्य द्वे अधिष्ठाने – संभोगो विप्रलम्भश्च । तत्र संभोगस्तावद् ऋतुमाल्यानुलेपनालंकारेष्टजनविषयवरभवनोपभोगोपवनगमनानुभवनश्रवणदर्शनक्रीडालीलादिभिर्विभावै[11]स्समु[12]-त्पद्यते । तस्य नयनचातुरी[13]भ्रूक्षेप[14]कटाक्षसंचारललितमधुराङ्गहारवाक्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः[15] । [16]व्यभिचारिणस्त्रासा[17]लस्यौग्र्यजुगुप्सावर्जम् । विप्रलम्भकृतस्तु निर्वेदग्लानिशङ्कासूयाश्रमचिन्तौत्सुक्यनिद्रासुप्त[18]स्वप्नविबोध[19]व्याध्युन्मादापस्मारजाड्यमोह[20]मरणादिभिरनुभावै-रभिनेतव्यः ।

अत्राह – यद्ययं रतिप्रभवः शृङ्गारः कथ[21]मस्य करुणाश्रयिणो भावाः[22] । अत्रोच्यते – पूर्वमेवाभिहितं संभोगविप्रलम्भकृतः शृङ्गार इति । [23]वैशिकशास्त्रकारै[24] दशावस्थोऽभिहितः ताश्च सामान्याभिनये वक्ष्यामः । करुणस्तु[25] शापक्लेशविनिपतितेष्टजनविप्रयोग[26]विभवनाशवधबन्धसमुत्थो निरपेक्षभावः । औत्सुक्यचिन्तासमुत्थः सापेक्षभावो[27] । एवमन्यः करुणो[28]ऽन्यश्च विप्रलम्भ इति । एवमेष सर्वभावसंयुक्तः शृङ्गारो भवति । अपि च[29]

[30]सुखप्रायेष्टसंपन्न ऋतुमाल्यादिसेवकः ।
पुरुषः प्रमदायुक्तः शृङ्गार इति संज्ञितः ।।४५।।

---

1. D_1 V_{1-2} P_{1-4} transpose the two lines ab & cd of this verse., 2. D_1 P_{1-4} देवःस्याद् □ See note.
3. D_1 V_1 P_{1-4} ins. ^{0}रसाना^{0}, 4. V_1 P_{1-4} रसानामनुक्रमिष्याम इति ।, 5. D_1 V_{1-2} P_{1-4} om. हृद्य^0 (hence उ^0)
6. D_1 V_{1-2} P_{1-4} ^{0}वेषात्मकः 7. D_1 V_{1-2} P_{1-4} ins. लोके, 8. D_1 V_{1-2} P_{1-4} मेध्यमुज्जवलं, 9. D_1 भवति तत्सर्वं
10. D_1 M_1 V_1 P_{1-4} ^{0}पुरुष^0 11. P_{1-4} ^{0}भिर्यैर्भावै, 12. D_1 V_{1-2} P_{1-4} ^{0}रुत्प^0, 13. D_1 M_1 V_2 P_{1-4} ^{0}र्यै^{0}
14. M_5 V_2 P_1 ^{0}भ्रूविक्षेप^0 15. M_1 V_2 अभिनेतव्यः (for अभि…क्तव्यः, syntactically wrong)
16. M_1 V_2 om. व्यभि^{0}… ^{0}नेतव्यः । 17. D_1 V_1 P_{1-4} ^{0}श्चास्या^{0} (^{0}स्त्रासा^{0}), 18. D_1 P_{1-4} om. सुप्त^0
19. P_{1-4} ^{0}बिब्बोक, 20. D_1 V_1 P_{1-4} om. ^{0}मोह^0 21. M_{2-3} ins. ^{0}मिदानी^{0}, 22. D_1 M_1 V_{1-2} ins. भवन्ति ।
23. M_1 om. a large portion from वैशिक…upto इति in V.45., 24. M_3 V_2 ^{0}शास्त्रैश्च, 25. M_2 ins. पुनः
26. D_1 $M_{2, 4-5}$ P_{1-4} om. विप्रयोग, 27. D_1 V_1 ins. विप्रलंभकृतः V_2 P_{1-4} विप्रलंभः ।
28. $M_{2, 4-5}$ om. एवमन्यः करुणो & च, 29. $M_{2, 4}$ अत्र श्लोकः, 30. D_1 om. verse 45.

अपि चात्र सूत्रानुबद्धे आर्ये भवतः

ऋतुमाल्यालंकारैः प्रियजनगान्धर्वकाव्यसेवाभिः ।
उपवनगमनविहारैः शृङ्गाररसः समुद्भवति ॥४६॥

नयनवदनप्रसादैः स्मितमधुरवचोधृतिप्रमोदैश्च ।
ललितै[1]श्चाङ्गविकारैस्तस्याभिनयः प्रयोक्तव्यः ॥४७॥

(इति शृङ्गाररसप्रकरणम्)[2]

अथ हास्यो नाम हासस्थायिभावात्मकः । स च विकृत[3]वेषालंकारधाष्टर्यलौल्यकुहका[4]सत्प्रलापव्यङ्गदर्शनदोषाद्युदाहरणादिभिर्विभावै[5]स्समुत्पद्यते[6] । तस्य नासाकपोलौष्ठदंशन[7]स्पन्दनदृष्टिव्याकोशाकुञ्चनस्वेदास्यरागपार्श्वग्रहणादिभिरनुभावैरभिनयः प्रयोक्तव्यः । व्यभिचारिणश्चावहित्थालस्यतन्द्रीनिद्रास्वप्नासूया[8]दयः । द्विविधश्चायम्[9]–आत्मस्थः परस्थश्च । यदा स्वयं हसति तदात्मस्थः । यदा परं हासयति तदा परस्थः । अत्रानुवंश्ये आर्ये भवतः–

विपरीतालंकारैर्विकृताचाराभिधानवेषैश्च ।
विकृतैरङ्गविकारै[10]र्हसतीति रसः स्मृतो हास्यः ॥४८॥

विकृताचारैर्वाक्यैरङ्गविकारै[11]श्च विकृतवेषकृतैः[12] ।
हासयति जनं यस्मात्तस्माज्ज्ञेयो रसो हास्यः ॥४९॥

स्त्रीनीचप्रकृतावेष भूयिष्ठं दृश्यते रसः ।
षड्भेदाश्चास्य विज्ञेयास्तांश्च वक्ष्याम्यहं पुनः[13] ॥५०॥

---

1. D_1 V_{1-2} P_{1-4} मधुरै°, **2.** All mss. om. this and all following sub-topics' colophons.
3. D_1 V_1 P_{1-4} ins. °पर°, **4.** M_1 V_2 °कलहा°, **5.** M_1 V_2 °दिभिर्भावै°, **6.** D_1 V_1 P_{1-4} °वैरुत्पद्यते
7. D_1 V_{1-2} P_{1-4} om. °दंशन°

(N.B. from this section, we omit the details of transpositions of words like (नासाकपोलौष्ठदंशन–ओष्ठनासकपोल or अवहित्थालस्य–आलस्यावहित्थ, for they are too numerous and do not have any special significance. At such places we try follow SV as far as possible.)

8. $M_{1,4}$ V_2 °प्रबोध°; D_1 P_{1-4} om. असूया, **9.** P_{1-4} °धोहास्यः–, **10.** M_1 V_2 °रर्थविशेषै° P_{1-4} °विहारै°
11. M_2 V_2 °विहारै°, **12.** D_1 M_1 V_1 P_{1-4} °वेषैश्च, **13.** $M_{2,4}$ °महे परम् ।

स्मितमथ हसितं[1] विहसितमुपहसितं[2] चापहसितमतिहसितम् ।
द्वौ द्वौ भेदौ स्यातामुत्तममध्यमाधमप्रकृतौ ।।५१।।

स्मितहसिते ज्ये[3]ष्ठानां मध्यानां विहसितोपहसिते च ।
अधमानामपहसितं ह्यतिहसितं चापि विज्ञेयम् ।।५२।।

अत्र श्लोकाः

ईषद्विक[4]सितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः ।
अलक्षितद्विजं चैतदु[5]त्तमुत्तमानां स्मितं भवेत् ।।५३।।

उत्फुल्लाननने त्रै[6]स्तु गण्डैर्विक[7]सितैरथ ।
किंचिल्लक्षितदन्तं च हसितं तत्प्रकीर्तितम्[8] ।।५४।।

[9]आकुञ्चिताक्षिगण्डं यत्सस्वरं[10] मधुरं च यत्[11] ।
कालागतं सास्यरागं तद्वै विहसितं भवेत् ।।५५।।

उत्फुल्लनासिकं यच्च[12] जिह्मदृष्टिनिरीक्षितम्[13] ।
निह[14]ञ्चितांसकशिरस्तच्चोपहसितं भवेत् ।।५६।।

[15]अस्थानहसितं यत्तु साश्रुनेत्रं तथैव च ।
उत्कम्पितांसकशिरस्तच्चापहसितं भवेत् ।।५७।।

संरब्धसाश्रु[16]नेत्रं च विक्रुष्ट[17]स्वरमुद्धतम् ।
करोपगूढपार्श्वं च तच्चातिहसितं भवेत् ।।५८।।

---

1. M_2 सहितं V_2 om., **2.** M_2 ^{0}सितमिति ।, **3.** D_1 P_{1-4} श्रे^{0}, **4.** D_1 M_1 V_2 P_{1-4} ^{0}ह^0, **5.** D_1 V_{1-2} P_{1-4} धीरमु^{0}
6. D_1 P_{1-4} ^{0}नेत्रं, **7.** V_2 ^{0}ह^0, **8.** D_1 $M_{1,4}$ V_{1-2} P_{1-4} तद्विधीयते, **9.** M_3 ins. अथ मध्यानां, **10.** D_1 V_1 P_{1-4} ^{0}स्वनं
11. D_1 M_1 P_{1-4} तथा (for च यत्), **12.** D_1 V_1 P_{1-4} यत्तु, **13.** M_1 V_2 ^{0}क्षणं, **14.** D_1 V_{1-2} P_{1-4} ^{0}कु^{0}, **15.** See note
16. M_1 V_2 ^{0}सास्र^0, **17.** D_1 om. विकृष्ट in the text, reads in margin उत्कृष्ट. M_1 V_2 read दु for क्रु.

हास्य[1]स्थानानि यानि स्युः कार्योत्पन्नानि नाटके ।
उत्तमाधममध्यानामेवं तानि प्रयोजयेत् ।।५९।।

इत्येष स्व[2]समुत्थस्तथा परसमुत्थितश्च विज्ञेयः[3] ।
द्विविधस्त्रि[4]प्रकृतिगतस्त्र्यवस्थभावो रसो[5] हास्यः ।।६०।।

(इति हास्यप्रकरणम्)

अथ करुणो नाम शोकस्थायिभावप्रभवः । स च शापक्लेशविनिपतितेष्ट[6]जनविप्रयोगविभवनाशवधबन्धविद्रवोपघातव्यसनसंयोगा[7]दिभिर्विभावैः समुपजायते । तस्याश्रु[8]पातपरिदेवनमुखशोषणवैवर्ण्यस्रस्तगात्र[9]तानिःश्वासस्मृतिलोपा[10]दिभिरनुभावै[11]रभिनयः प्रयोक्तव्यः । व्यभिचारिणश्चास्य निर्वेदग्लानिचिन्तौत्सुक्यावेगभ्रम[12]मोहश्रमभयविषाददैन्यव्याधिजडतोन्मादापस्मारत्रासा[13]लस्यमरणस्तम्भवेपथुवै-वर्ण्याश्रुस्वरभेदादयः । अत्रार्ये भवतः–

इष्टवधदर्शनाद्वा विप्रियवचनस्य संश्रवा[14]द्वापि ।
एभिर्भावविशेषैः करुणरसो नाम संभवति ।।६१।।

सस्वनरुदितैर्मोहागमै[15]श्च परिदेवितैर्विलपितैश्च ।
[16]अभिनेयः करुणरसो देहायासाभिघातैश्च ।।६२।।

(इति करुणरसप्रकरणम्)

---

1. V_2 हास^0, 2. M_1 V_2 एवमात्मसमुत्थं च तथा, 3. M_1 V_2 om. last four syllables i.e. च विज्ञेयः
4. M_1 V_2 त्रिप्रकृतिकष्षट्भेदोथ रसः स्मृतः, 5. D_1 स यो, again in margin स्मृतो (for रसो)
6. M_1 ^{0}निपतनेष्ट^0 V_2 ^{0}निपातनेष्ट^0, 7. M_1 ^{0}संशया^{0}, 8. M_1 V_2 अस्य चाश्रु^{0}, 9. M_1 ^{0}हस्त^0, 10. V_2 ^{0}विलोपा^{0}
11. V_2 om. ^{0}रनुभावै^{0}, 12. D_1 P_{1-4} om. आवेगभ्रम, 13. D_1 P_{1-4} om. त्रास, 14. M_1 V_2 ^{0}या^{0}
15. M_1 V_2 ^{0}मोहोद्गमै^{0}, 16. Perhaps, in M-Version of this verse, cd was ab, a pure conjecture.

अथ रौद्रो नाम क्रोधस्थायिभावात्मको रक्षोदानवोद्धतमनुष्यप्रकृतिः[1] सङ्ग्रामहेतुकः । स च [2]धर्षणाधिक्षेपावमाना[3]नृतवचन[4]वाक्पारुष्याभि[5]द्रोहमात्सर्यादिभिर्विभावैस्समु[6]त्पद्यते । तस्य ताडन[7]पीडनच्छेद्यभेद्यप्रहरणाप[8]हरणशस्त्रसंपातसंप्रहाररुधिराकर्षणाद्यानि कर्माणि[9] । पुनश्च रक्तनयनभ्रुकुटीकरण[10]दन्तौष्ठपीडनगण्डस्फुरणा[11]ग्रहस्त[12]निष्पेषणादिभिरनुभावैरभिनयः प्रयोक्तव्यः । भावा[13]श्चास्य-संमोहोत्साहावेगामर्षचपलतौग्र्यगर्व[14]स्वेदवेपथुरोमाञ्चा[15]दादयः । अत्राह-यदभिहितं रक्षोदानवानां[16] रौद्रो रसः स[17] किमन्येषां नास्तीत्यु[18]च्यते । अस्त्यन्येषामपि रौद्रः किन्त्वा[19]धिकारोऽत्र गृह्यते । ते हि स्वभावत एव रौद्राः । कस्मात्[20] । बहुबाहवो बहुमुखाः प्रोद्धतविकीर्णपिङ्गलशिरोजा रक्तोद्वृत्तलोचना[21] भीमासितरूपिणश्च[22] । यच्चं किंचित्समा[23]रभन्ते स्वभावचेष्टितं वागङ्गादिकंवा[24] तत्सर्वं रौद्रमेवैषाम् । [25]शृङ्गारश्च तैः प्रायशः प्रसभं सेव्यते । तेषां चानुकारिणो ये पुरुषास्तेषामपि सङ्ग्रा[26]मसंप्रहारकृतो रौद्रो रसोऽनुमन्तव्यः । अत्रानुवंश्ये आर्ये भवतः-

युद्ध[27]प्रहारघातन[28]विकृतच्छेदन[29]विदारणैश्चैव ।
सङ्ग्रामसंभ्रमाद्यै[30]रेभिः संजायते रौद्रः ।।६३।।

नानाप्रहरणमोक्षैः[31] शिरःकबन्धभुजकर्तनैश्चैव ।
एभिस्त्व[32]र्थविशेषैरस्याभिनयः प्रयोक्तव्यः ।।६४।।

इति रौद्ररसो दृष्टो[33] रौद्रवागङ्गचेष्टितः ।
शस्त्रप्रहारभूयिष्ठ उग्रकर्मक्रियात्मकः ।।६५।।

(इति रौद्ररसप्रकरणम्)

अथ वीरो नाम उत्तमप्रकृतिरुत्साहात्मकः । स चासंमोहाध्यवसायनयविनयबल[34]पराक्रमशक्तिप्रतापप्रभावादिभिर्विभावैरुत्पद्यते । तस्य स्थैर्यधैर्यशौर्यत्यागवैशारद्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः । सञ्चारिण[35]श्चास्य धृतिमति[36]गर्वावेगौग्र्यामर्षस्मृतिरोमाञ्चादयः । अत्रानुवंश्ये आर्ये भवतः -

---

1. M_1 V_2 °प्रभवः, 2. D_1 P_{1-4} V_{1-2} क्रोधाधर्षण°, 3. D_1 P_{1-4} om. °वमाना°, 4. D_1 V_1 P_{1-4} ins. °उपघात°
5. M_1 V_2 om. °अभि°, 6. D_1 P_{1-4} °वैरुत्प°, V_2 समुपजा°, 7. D_1 M_1 P_{1-4} add °पाटन°, 8. D_1 V_{1-2} P_{1-4} ins. °प°
9. M_1 V_2 कार्याणि, 10. M_3 M_5 ins. अवष्टंभ, 11. M_1 V_2 °चालन° (for °स्फुरण°), 12. D_1 M_4 V_{1-2} P_{1-4} °हस्ताग्र°
13. M_1 V_2 व्यभिचारिण°, 14. D_1 M_1 V_2 P_{1-2} om. °गर्व°, 15. $M_{1,3}$ V_{1-2} ins. °गद्गद°
16. M_1 V_2 राक्षसादीनां M_4 दानवादीनां, 17. D_1 M_1 V_{1-2} P_{1-4} om. स, 18. D_1 P_{1-4} नास्ति । उच्यते
19. D_1 P_{1-4} किंत्व°, 20. V_2 om., 21. D_1 V_{1-2} P_{1-4} विलोचना, 22. D_1 V_{1-2} P_{1-4} °श्चैव, 23. D_1 P_{1-4} किंचिदा°
24. D_1 M_2 V_1 P_{2-4} om. वा, 25. M_1 V_2 om. the whole sentence, 26. V_2 om. संग्राम, 27. M_1 V_2 सत्त्व°
28. D_1 V_{1-2} P_{1-4} °पातन°, 29. M_1 V_2 °विच्छेद° (for वि...दन°!), 30. M_1 V_2 °मोत्थै°
31. M_1 V_2 °संकुल° (for मौक्षैः), 32. D_1 V_2 P_{1-4} °श्चा°, 33. V_2 om., 34. M_1 V_2 °बहुल°
35. D_1 P_{1-4} भावा° M_1 V_2 संचारिभावा°, 36. P_{1-4} °मान° (for °मति°)

उत्साहाध्यवसायादविषादित्वादविस्मयान्मोहात् ।
विविधाद[1]र्थविशेषाद्वीररसो नाम संभवति ।।६६।।

स्थिति[2]धैर्य[3]वीर्यगर्वैरुत्साहपराक्रमप्रभावैश्च ।
वाक्यैश्चाक्षेपकृतैर्वीररसः सम्यगभिनेय ः ।।६७।।

(इति वीररसप्रकरणम्)

अथ भयानको नाम भयस्थायिभावप्रभवः[4] । स च विकृतरस[5]सत्त्वदर्शनाशिवोलूकत्रा[6]सोद्वेगशून्यागारारण्य[7]प्रवेश[8]स्मरण[9]स्वजनवधबन्धदर्शनश्रुतिकथादिभिर्विभावैरुत्पद्यते । तस्य प्रवेपित[10]करचरणनयनचलन[11]पुलक[12]मुखवैवर्ण्य[13]स्वरभेदादिभिरनुभावैरभिनयः प्रयोक्तव्यः । व्यभिचारि[14]भावाश्चास्य स्तम्भस्वेदगद्गदरोमाञ्चवेपथुस्वरभेदवैवर्ण्यशङ्कामोहदैन्यावेगचापल[15]जडतात्रासापस्मारमरणादयः[16]। [17]अत्रानुवंश्या आर्या भवन्ति–

विकृतरव[18]सत्त्वदर्शनसङ्ग्रामारण्यशून्यगृहगमनात् ।
गुरुनृपयोरपराधात्कृतकश्च भयानको ज्ञेयः ।।६८।।

गात्रमुखदृष्टिभेदैरूरुस्तम्भाभि[19]वीक्षणोद्वेगैः ।
सन्न[20]मुखशोषहृदयस्पन्दन[21]रोमोद्गमैश्च भयम्[22] ।।६९।।

एतत्स्वभावजं स्यात्सत्त्व[23]समुत्थं तथैव कर्तव्यम्[24] ।
पुनरेभिरेव भावैः कृतकं मृदुचे[25]ष्टितैः कार्यम्[26] ।।७०।।

करचरणवेपथुस्तम्भगात्रसंकोचहृदयकम्पेन ।
शुष्कौष्ठतालुकण्ठैर्भयानको नित्यमभिनेयः ।।७१।।

(इति भयानकरसप्रकरणम् ।)

---

1. M_1 P_{1-4} om. °द°, 2. M_1 V_2 स्मृति°, 3. D_1 M_1 V_2 °शौर्य° (insert at different places in this line.)

4. D_1 M_3 V_{1-2} P_{1-4} °भावात्मकः

5. D_1 V_{1-2} P_{1-4} °रव° (This reading is confirmed, though in verse 68 below), 6. M_1 V_2 °शिवोत्कात्रास°

7. D_1 P_{1-4} om. °गारा°, 8. D_1 V_1 P_{1-4} °गमन° (for °प्रवेश°), 9. M_1 °मरण° D_1 V_1 P_{1-4} om. °स्मरण°

10. $M_{2, 4-5}$ प्रवेशित°, 11. P_{1-4} °चपल°, 12. P_{1-4} om. °पुलक°, 13. $M_{2, 5}$ °वर्ण्यं, 14. D_1 V_1 P_{1-4} om. व्यभिचारि°

15. D_1 P_{1-4} °चपलता° (for चापल), D_1 M_1 P_{1-4} om. °जडता°

16. M_{2-3} break the list of transitory states from °जडता, transpose the two compounds and end both with °आदयः

17. M_1 drop the sentence °अत्रा etc., V_2 ins. इति here, D_1 V_1 P_{1-4} only अत्रार्याः, 18. cf. no. 5 above

19. M_1 °ति°, 20. P_{1-4} सांत्व, 21. P_{1-4} °स्पन्द°, 22. M_1 भयः, 23. P_{1-4} सांत्व°, 24. V_2 °व्यः

25. P_{3-4} मुहुवे° D_1 P_{1-2} मृदुवे°, 26. M_1 V_2 °तैश्च भयम् ।

अथ बीभत्सो नाम जुगुप्सास्थायिभावात्मकः । स चाहृद्या[1]प्रियाचोक्षानिष्टश्रवणदर्शनपरि[2]कीर्तनादिभिर्विभावैरुत्पद्यते । तस्य सर्वाङ्गसंहारमुखनेत्र[3]विकूणनो[4]ल्लेखननिष्ठीवनोद्वेजनादिभिरनुभावैरभिनयः प्रयोक्तव्यः । [5]व्यभिचारिभावाश्चास्य अपस्मारा[6]वेगमोहव्याधिमरणादयः । अत्रानुवंश्ये आर्ये भवतः-

अनभिमत[7]दर्शनेन च रसगन्धस्पर्शशब्द[8]दोषैश्च ।
उद्वेजनैश्च[9] बहुभिर्बीभत्सरसः समुद्भवति ।।७२।।

मुखनेत्रविकूणन[10]या नासाप्रच्छादनावनमि[11]तास्यैः ।
अव्यक्तपादपतनैस्तस्याभिनयः प्रयोक्तव्यः[12] ।।७३।।

(इति बीभत्सरसप्रकरणम् ।)

अथाद्भुतो नाम विस्मयस्थायिभावात्मकः । स च दिव्यदर्शनेप्सितमनोरथावाप्त्युत्तमभवनदेवकुलादिगमनसभाविमानमायेन्द्रजाल[13]साधना[14]दिभिर्विभावैस्समु[15]त्पद्यते । तस्य नयनविस्तारानिमेषप्रेक्षणरोमाञ्चाश्रुस्वेदहर्षसाधुवादप्रदानप्रबन्धहाहाकारबाहुवदन[16]चेला[17]ङ्गुलिभ्रमणादिभिरनुभावैरभिनयः प्रयोक्तव्यः । [18]भावाश्चास्य-स्तम्भास्रस्वेदगद्गदरोमाञ्चावेग[19]संभ्रम[20]जडताप्रलया[21]दयः । अत्रानुवंश्ये आर्ये भवतः-

यत्त्वतिशयार्थयुक्तं वाक्यं शील[22] च कर्म रूपं वा[23] ।
[24]तत्सर्वमद्भुतरसे विभावरूपं हि विज्ञेयम् ।।७४।।

स्पर्शग्रहोल्लुकसनैर्हाहाकारैश्च साधुवादैश्च[25] ।
वेपथुगद्गदवचनैः स्वेदाद्यैरभिनयस्तस्य ।।७५।।

(इत्यद्भुतरसप्रकरणम् ।)

---

1. D_1 V_1 P_{1-4} ins. ^{0}प्रशस्ता^{0}, 2. D_1 P_{1-4} om. ^{0}परि^{0}, 3. D_1 P_{1-4} om. ^{0}नेत्र^0, 4. M_1 ^{0}अवकूणन^0, V_2 विघूर्णन^0
5. D_1 V_1 P_{1-4} om. व्यभिचारि^{0}, 6. M_1 V_2 add ^{0}गृहचेष्टित^0 (?^{0}गुह्य^0?), 7. M_1 V_2 ^{0}भिहित, 8. P_{1-4} om. ^{0}शब्द^0
9. M_1 V_2 ^{0}जने च, 10. V_2 ^{0}घूर्णन^0, 11. M_{2-3} om. ^{0}मि^{0}
12. for ft.d, D_1 V_1 P_{1-4} बीभत्सः सम्यगभिनेयः, V_2 सम्यगभिनयः, M_1 ins. प्रयोक्तव्यः, 13. M_2 om. ^{0}जाल^0
14. P_{1-4} संभावना^{0}, 15. D_1 M_1 V_{1-2} P_{1-4} ^{0}रु^{0}, 16. M_1 V_2 ^{0}करचरण^0 D_1 P_{1-4} ^{0}बाहुवदन^0, 17. M_1 V_2 om. ^{0}चेल^0
18. $M_{1,3,5}$ V_2 ins. व्यभिचारि^{0}, 19. M_2 ^{0}वेश^0, 20. V_1 ins. ^{0}प्रहर्षश्चपलतोन्मादधृति^{0}, 21. D_1 P_{1-4} ^{0}प्रलापा^{0}
22. D_1 P_{1-4} शिल्पं, 23. $M_{1,3}$ V_2 च, 24. for the whole line $M_{1,5}$ V_2 एभिस्त्वर्थविशेषै रसोऽद्भुतो नाम विज्ञेयः ।।
25. P_{1-4} om. साधुवादैश्च

शृङ्गारं त्रिविधं विद्याद्वाङ्[1]नेपथ्यक्रियात्मकम् ।
अङ्गनेपथ्यवाक्यैश्च हास्यरौद्रौ त्रिधा[2] स्मृतौ ।।७६।।

धर्मोपघातजश्चैव तथा त्व[3]पचयोद्भवः ।
तथा शोक[4]कृतश्चैव करुणस्त्रिविधः स्मृतः ।।७७।।

दानवीरं धर्मवीरं युद्धवीरं तथैव च[5] ।
रसं वीरमपि प्राहुः तज्ज्ञा[6]स्त्रिविधमेव हि[7] ।।७८।।

व्याजाच्चैवापराधाच्च वित्रा[8]सितकमेव च ।
पुनर्भयानकं चापि[9] विद्यात्त्रिविधमेव च[10] ।।७९।।

बीभत्सः क्षोभजः शुद्ध उद्वेगी स्याद्द्वि[11]तीयकः ।
विष्ठाकृमिभिरुद्वेगी क्षोभजो रुधिरादिजः ।।८०।।

दिव्यश्चानन्दजश्चैव द्विधा ख्यातोऽद्भुतो रसः ।
दिव्यदर्शनजो दिव्यो हर्षादानन्दजः स्मृतः ।।८१।।

एवमेते रसा ज्ञेयास्त्वष्टौ लक्षणलक्षिताः ।
अत ऊर्ध्वं प्रवक्ष्यामि भावानामपि लक्षणम् ।।८२।।

इति श्रीभारतीये नाट्यशास्त्रे रसविकल्पो[12] नाम षष्ठोऽध्यायः ।

---

1. M_1 V_2 ⁰द्याद्भ्रू⁰, 2. D_1 P_{1-4} तथा, 3. D_1 V_1 P_{1-4} तथार्था⁰, 4. M_1 V_2 योग⁰
5. D_1 om. वीरं...च, adds in margin वीरमतस्त्रिधा ।, 6. D_1 P_{1-4} ब्रह्मा, 7. V_2 ⁰सम्मतम् । (for ⁰मेव हि)
8. P_{1-4} विवा⁰, 9. D_1 V_1 P_{1-4} चापि, 10. D_1 V_1 P_{1-4} हि, 11. M_{1-5} V_2 तृ⁰(?)
12. D_1 V_1 P_{1-4} रसाध्यायः षष्ठः M_2 रसस्वरूपपरिपाठनं

[1](अथ शमो नाम शमस्थायिभावात्मको मोक्षप्रवर्तकः । स तु तत्त्वज्ञानवैराग्याशयशुद्ध्यादिभिर्विभावैः समुत्पद्यते । तस्य यमनियमाध्यात्मध्यानधारणोपासनसर्वभूतदयालिङ्गग्रहणादिभिरनुभावैरभिनयः प्रयोक्तव्यः । व्यभिचारिणश्चास्य निर्वेदस्मृतिधृतिसर्वाश्रमशौचस्तम्भरोमाञ्चादयः । अत्रार्याः श्लोकाश्च भवन्ति–

मोक्षाध्यात्मसमुत्थस्तत्त्वज्ञानार्थहेतुसंयुक्तः ।
नैःश्रेयसोपदिष्टः शान्तरसो नाम संभवति ।।
बुद्धीन्द्रियकर्मेन्द्रियसंरोधाध्यात्मसंस्थितोपेतः ।
सर्वप्राणिसुखहितः शान्तरसो नाम विज्ञेयः ।।
न यत्र दुःखं न सुखं न द्वेषो नापि मत्सरः ।
समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः ।।
भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः ।
विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते ।।
स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते ।
पुनर्निमित्तापाये च शान्त एवोपलीयते ।।
एवं नवरसा दृष्टा नाट्यज्ञैर्लक्षणान्विताः ।।)

(इति शान्तरसप्रकरणम् ।)

---

1. See note.

सप्तमोऽध्यायः ।

भावानिदानीं व्याख्यास्यामः[1] । [2]अत्राह–भावा इति कस्मात् । किं भवन्तीति भावाः[3]। किं वा[4] भावयन्तीति भावाः[5] । उच्यते–वागङ्गसत्त्वोपेतान्काव्यार्थान्भावयन्तीति भावा इति[6] । णिजन्त–भू इति धातोः करणे घञ्[7] । तथा च[8] वासनाकृत[9]मित्यनर्थान्तरम् । लोकेऽपि च प्रसिद्धमहो ह्यनेन गन्धेन रसेन वा सर्वमेव भावितमिति । तच्च व्याप्त्यर्थम् । श्लोकाश्चात्र–[10]

विभावेनाहृतो योऽर्थो [11]ह्यनुभावैस्तु[12] गम्यते ।
वागङ्गसत्त्वाभिनयैः स भाव इति संज्ञितः ॥१॥

वागङ्गमुखरागेण[13] सत्त्वेनाभि[14]नयेन च ।
कवेरन्तर्गतं भावं भावयन्भाव उच्यते ॥२॥

नानाभिनयसंबद्धान्भावयन्ति रसानिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः ॥३॥

अथ[15] विभाव इति कस्मात् । उच्यते । विभावो विज्ञानार्थः । [16]विभावः कारणं निमित्तं हेतुरिति पर्यायाः । विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इत्यतो विभावः । यथा विभावितं विज्ञापित[17]मित्यनर्थान्तरम् । अत्र श्लोकः–

बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रयाः[18] ।
अनेन यस्मात्तेनायं विभाव इति संज्ञितः ॥४॥

अथानुभाव इति कस्मात् । उच्यते । [19]अनुभाव्यतेऽनेन वागङ्गसत्त्वकृतोऽभिनय इति । अत्र श्लोकः–

[20]वागङ्गाभिनयेनेह यतस्त्वर्थोऽनुभाव्यते ।
[21]शाखाङ्गोपाङ्गसंयुक्तस्त्वनुभावस्ततः[22] स्मृतः ॥५॥

[23]एवं ते विभावानुभावसंयुक्ता भावा इति व्याख्याताः । अतो ह्येषां भावानां सिद्धिर्भवति । तस्मादेषां[24] भावानां विभावानुभावसंयुक्तानां लक्षणनिदर्शनान्यभिव्याख्यास्यामः–तत्र विभावानुभावौ लोकप्रसिद्धौ[25] । लोकस्वभावानु[26]गतत्वाच्च तयो[27]र्लक्षणं नोच्यतेऽतिप्रसङ्गनिवृत्त्यर्थम् । भवति चात्र[28] श्लोकः–

---

1. D_1 M_1 V_2 P_{1-4} वक्ष्यामः, 2. P_{1-4} om. अत्राह... भवन्तीति भावाः D_1 अत्राह... कस्मात् । M_3 किंभवन्तीति भावाः ।
3. M_1 V_2 किं... भावाः, 4. D_1 M_3 P_{1-4} om. वा, 5. D_1 P_{1-4} om. भावाः, 6. D_1 V_2 P_{2-4} om. इति
7. (for the whole sentence) D_1 V_1 P_{1-4} भूइति करणे धातुः $M_{1,5}$ V_2 करणसाधनं
8. D_1 P_{1-4} om. तथाच $M_{1,5}$ V_2 यथा, 9. D_1 P_{1-4} भावितं कृत^0 $M_{1,5}$ V_2 भावितः वासितः कृत^0
10. D_1 V_1 P_{1-4} ins. भवंति, 11. D_1 M_1 V_2 P_{1-4} om. ^{0}र्थस्त्वनु^{0}, 12. M_1 V_2 ^{0}वेन 8. D_1 P_{1-4} ^{0}वैश्च, 13. M_1 V_2 ^{0}गैश्च
14. P_{1-4} सात्वताभि^{0}, 15. D_1 M_1 V_2 P_{1-4} om. अथ, 16. P_{1-4} om. the sentence, 17. D_1 M_1 V_{1-2} P_{1-4} विज्ञात^0
18. M_1 V_2 ^{0}श्रिताः, 19. P_{1-4} यदयमनुभावयति वा... कृतमभिनयं ।; M_1 V_2 यदयमनुभावयति नानार्थाभिनिष्पन्नो वाग^0
20. D_1 P_{1-4} वागंगसत्वाभिनयैर्यस्मादर्थो^{0}, 21. D_1 P_{1-4} वागंगोपा^{0}, 22. D_1 P_{1-4} इति (for स्ततः)
23. D_1 P_{1-4} om. एवं... सिद्धिर्भवति।, 24. D_1 P_{1-4} एवमेतेषां (then om. भावानां), 25. M_1 V_2 ^{0}सिद्धावेवा
26. D_1 M_1 V_2 P_{1-4} ^{0}भावोप^0, 27. M_1 V_2 ^{0}त्वादेषां लक्ष^0, 28. D_1 P_{1-4} om. भवति च^0

लोकस्वभावसंसिद्धा लोकयात्रानुगामिनः[1] ।
अनुभावा विभावाश्च ज्ञेयास्त्वभिनये बुधैः[2] ।।६।।

तत्राष्टौ भावाः स्थायिनः । त्रयस्त्रिंशद्व्यभिचारिणः । अष्टौ सात्त्विका[3] इति भेदाः[4] । एवमेते काव्यरसाभिव्यक्तिहेतव एकोनपञ्चाशद्भावाः प्रत्यवगन्तव्याः । [5]एभ्यश्च सामान्यगुणयोगेन रसा निष्पद्यन्ते । अत्र श्लोकः–

योऽर्थो हृदयसंवादी तस्य भावो रसोद्भवः ।
शरीरं व्याप्यते तेन शुष्कं काष्ठमिवाग्निना ।।७।।

अत्राह–यदि काव्यार्थ[6]संश्रितै[7]र्विभावानुभावव्यञ्जितैरेकोनपञ्चाशद्भावैः सामान्यगुणयोगेनाभिनिष्पद्यन्ते रसाः, तत्कथं स्थायिन एव भावा रसत्त्वमाप्नुवन्ति । उच्यते–यथा हि समानलक्षणास्तुल्यपाणिपादोदरशरीराः समानाङ्गप्रत्यङ्गा अपि पुरुषाः[8] कुलशीलविद्याकर्मशिल्पविचक्षणत्वाद्राज[9]त्वमाप्नुवन्ति तत्रैव चान्येऽल्पबुद्धयस्तेषामेवानुचरा भवन्ति तथा विभावानुभावव्यभिचारिणः स्थायिभावानुपाश्रिता[10] भवन्ति । इत्याश्रय[11]त्वात्स्वामिभूताः स्थायिनो भावाः । [12]त[13]त्स्थानीयपुरुषगुणभूता अन्ये भावाः[14] । तत्र स्थायिभावा रसत्वमाप्नुवन्ति । परिजनभूता व्यभिचारिणो भावास्तान् गुणतया आश्रयन्ते । अत्राह को दृष्टान्त इति । यथा नरेन्द्रो बहुजनपरिवारोऽपि स एव नाम लभते नान्यः सुमहानपि पुरुष[15]स्तथा विभावानुभावव्यभिचारिपरिवृतः[16] स्थायी भावो रसनाम[17] लभते[18] ।

[19]भवति चात्र श्लोकः–
यथा नराणां नृपतिः शिष्याणां च यथा गुरुः ।
एवं हि सर्वभावानां भावः स्थायी महानिह ।।८।।

[20]लक्षणं खलु पूर्वमभिहितमेषां रससंज्ञकानाम् । इदानीं भावसामान्यलक्षणमभिधास्यामः । तत्र स्थायिभावान् वक्ष्यामः[21] ।

---

1. M_1 V_2 ^{0}यायिनः, **2.** M_1 V_2 P_{1-4} ^{0}नयैर्बुधैः, **3.** D_1 P_{1-4} om. इति भेदाः, **4.** M_4 विभेदाः।, **5.** M_3 ins. अत्राह
6. D_1 M_1 V_2 P_{1-4} यदान्योन्यार्थ^0, **7.** D_1 P_{1-4} ^{0}संभूतै^{0}, **8.** D_1 P_{1-4} om. अपि पुरुषाः, **9.** M_1 V_2 ^{0}क्षणत्वयुक्ता राज^0
10. M_1 ^{0}नुस्मृता V_2 ^{0}नुसृता, **11.** D_1 V_1 P_{2-4} बह्वाश्रय^0, **12.** D_1 V_1 om. three sentences: तत्स्थानीय... आश्रयन्ते।
13. M_1 V_2 तद्वत्, **14.** M_1 V_2 P_{1-2} ins. तान् गुण(M_1 V_2 ^{0}वत्^{0})तयाश्रयन्ते
15. M_1 V_2 ins. तदा च बहुषु गच्छत्सु कश्चित्कचित् पृच्छति कोऽयमिति स च तमाह राजेत्येव हि, **16.** D_1 P_{1-4} ^{0}परिष्कृतः
17. D_1 P_{1-4} रसतां, **18.** M_1 V_2 ins. नरेन्द्रवत्।, **19.** P_{1-4} om. the sentence
20. P_{1-4} om. लक्षणं... वक्ष्यामः। D_1 om. upto ^{0}धास्यामः। **21.** M_1 V_2 व्याख्यास्यामः N.B. P_{1-4} queerly transpose the order of स्थायिभाव^s hereafter, they first treat हास, and then रति. Others thereafter are in the regular order (See note).

रतिर्नाम आमोदात्मको[1] भावः । स च[2] ऋतुमाल्यानुलेपनाभरणप्रियजन[3]वरभोजन भवनाप्रातिकूल्यादिभिर्विभावैः समुत्पद्यते[4] । तामभिनयेत् स्मितवदन[5]मधुरकथन[6]भ्रूक्षेपकटाक्षादिभिरनुभावैः ।

[7]अत्र श्लोकः-

इष्टार्थविषयप्राप्त्या रतिरित्युपजायते ।
सौम्यत्वादभिनेया सा[8] वाङ्माधुर्याङ्गचेष्टितैः ।।९।।

[9]**हासो** नाम विनोदात्मको भावः । स च[9a] परचेष्टानुकरणा[10]संबद्धप्रलापपौरोभाग्यमौर्ख्यादिभिर्विभावैः समुत्पद्यते । तमभिनयेत् पूर्वोक्तैर्हसितादिभिरनुभावैः[11] ।।

भवति चात्र श्लोकः-

परचेष्टानुकरणाद्धासः समुपजायते ।
स्मितहासातिहसितैरभिनेयः स पण्डितैः ।।१०।।

शोको नाम दुःखप्रदो भावः । स च[11a] इष्टजनवियोगविभवनाशवधबन्धदुःखानुभवना[11b]दिभिर्विभावैः समुत्पद्यते । तस्याश्रुपातपरिदेवितविलपितवैवर्ण्यस्वरभेदस्रस्तगात्रताभूमिपतन[12]सस्वनरुदिताक्रन्दित[13]दीर्घनिःश्वसित[14]जडतोन्मादमोहमरणादिभिरनुभावैरभिनयः प्रयोक्तव्यः । रुदितमत्र त्रिविधम्-आनन्दजमार्त्तिजमीर्ष्यासमुद्भवं[15] चेति ।

[16]भवन्ति चात्रार्याः-

[17]आनन्देर्ष्यार्त्तिकृतं त्रिविधं रुदितं सदा बुधैर्ज्ञेयम् ।
तस्य त्वभिनययोगान्विभावगतितः प्रवक्ष्यामि ।।११।।

हर्षोत्फुल्लकपोलं सानुस्मरणादपाङ्गविसृता[18]स्रम् ।
रोमाञ्चगात्रमनिभृत[19]मानन्दसमुद्भवं[20] भवति ।।१२।।

---

1. V_1 प्रमोदात्मिकाः (See note), 2. D_1 P_{1-2} om. आमो⁰... च, 3. D_1 V_1 P_{1-4} om. प्रियजन⁰,
4. D_1 P_{1-4} generally employ उत्पद्यते where M_{1-5} and V_2 employ समुत्पद्यते।. Even this distinction is not universal. Since these variants are not significant semantically, there are overlooked henceforth.
5. $M_{1,3-4}$ P_{1-4} om. ⁰वदन⁰, 6. D1 $M_{1,3-4}$ V_2 P_{1-4} ⁰वचन⁰ (for कथन) (See note), 7. D_1 M_1 V_2 P_{1-4} भवति चात्र
8. M_1 V_2 ⁰नेयो(ऽ)सौ, 9.. D_1 M_1 V_2 P_{1-4} ins. तत्र (N.B. D_1 and P_{1-4} actually begin the treatment of स्थायिभाव[s] with हास (!), then रति, etc. in regular order. Vide note VII.8.ff.)
9a. D_1 M_1 V_{1-2} P_{1-4} om. विनोदा⁰... स च, 10. $M_{3,5}$ V_1 $P_{2,4}$ ins. ⁰कुहक⁰, 11. D_1 M_1 V_2 P_{1-4} om. ⁰रनुभावै
11a. D_1 M_1 V_{1-2} P_{1-4} om. दुःख⁰... स च, 11b. D_1 P_{1-4} ⁰नुभावादि⁰
12. D_1 M_1 V_2 P_{1-4} ⁰पाता⁰ (for पतन) and om. ⁰सस्वनरुदिता⁰, 13. M_1 V_2 ins. ⁰विचेष्टित⁰
14. D_1 P_{1-4} om. ⁰जड... मरण⁰, 15. D_1 P_{1-4} ⁰कृतं (for समुद्भवं), 16. D_1 P_{1-5} तत्र (for the whole sentence)
17. All mss. except M_{2-5} om. the verse, 18. D_1 P_{1-4} ⁰निःसृता⁰ M_1 V_2 ⁰निभृता⁰
19. for ft. c, D_1 P_{1-4} रोमांचपुलकसंकुल⁰ M_1 V_2 ⁰रोमांचितगण्डं रोदन⁰
20. M_1 V_2 ⁰नंदजं (for ⁰नंदसमुद्भवं), but metrically faulty

पर्याप्तविमुक्तास्रं सस्वनमस्वस्थगात्रगतिचेष्टम् ।
भूमिनिपातनिवर्तित[1]विलपितमित्यार्तिजं भवति ॥१३॥

प्रस्फुरितौष्ठकपोलं सशिरःकम्पं तथा सनिःश्वासम्[2] ।
भ्रुकुटीकटाक्षकुटिलं स्त्रीणामीर्ष्याकृतं भवति ॥१४॥[3]

स्त्रीनीचप्रकृतिष्वेव शोको व्यसनसंभवः ।
धैर्येणोत्तममध्यानां नीचानां रुदितेन च ॥१५॥

क्रोधो नाम अनिष्टकारी भावः । स च प्रज्वलनात्मकः[4] आधर्षणाक्रोश[5]कलहविवादप्रतिकूलादिभिर्विभावैः समुत्पद्यते । [6]अस्य विकृष्टनासापुटोद्वृत्तनयनसंदष्टोष्ठपुटगण्डस्फुरणादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

[7]रिपुजो गुरुजश्चैव प्रणयिप्रभवस्तथा ।
भृत्यजः कृतकश्चेति क्रोधः पञ्चविधः स्मृतः ॥१६॥

अत्रार्या भवन्ति–

भ्रुकुटीकुटिलोत्कटमुखसंदष्टौष्ठः स्पृशन्करेण करम् ।
क्रुद्धः[8] स्वभुजप्रेक्षी[9] शत्रौ निर्यन्त्रणं रुष्येत्[10] ॥१७॥

किंचिदवाङ्मुखदृष्टिः सास्रः[11] स्वेदापमार्जनपरश्च ।
अव्यक्तोल्बणचेष्टो गुरौ विनययन्त्रितो[12] रुष्येत् ॥१८॥

---

1. $M_{1, 4-5}$ V_2 °निपातितचेष्टित° D_1 P_{1-4} °विवर्तित (for निवर्तित), 2. P_{1-4} निःस्वानम्
3. M_1 V_2 ins. कारणमपेक्षमाणः प्रायेणायासलिंगसंयुक्तः।
वीररसान्तरचारी कार्यः कृतको भवेच्छोकः ॥ (M_1 भवति शोकः ॥) (V_2 adds भवति श्लोकः।)
4. D_1 M_1 V_{1-2} P_{1-4} om. अनिष्ट...°नात्मकः, 5. M_1 P_{1-4} °णाक्षुण्णविवाद (for °आक्रोश°) & om. विवाद later,
6. D_1 M_1 V_2 P_{1-4} तमभिनयेदुत्फुल्लनासा... नुभावैः । (hence, om. अभि° etc.), 7. D_1 M_1 V_2 P_{1-4} om. the verse
8. P_{1-4} धृष्टः, 9. for ft. c, M_1 V_2 स्पृष्टभुजशिखरवक्षा, 10. V_2 कुट्टयेत्। 11. D_1 M_1 V_2 P_{1-4} किंचित् (for सास्रः)
12. D_1 P_{1-4} गुरोर्विनायंत्रितं $M_{1, 3, 5}$ V_2 गुरोर्विनियन्त्रणं

अल्पतरप्रविचारो विकिरन्नश्रूण्यपाङ्गविक्षेपैः ।
सभ्रुकुटीस्फुरितौष्ठः[1] प्रणयोप[2]गतां प्रियां[3] रुष्येत् ।।१९।।

अथ परिजने तु[4] रोषस्तर्जननिर्भर्त्सनाक्षिविस्तारैः ।
विप्रेक्षणैश्च विविधैरभिनेयः क्रूरतारहितः[5] ।।२०।।

कारणमवेक्षमाणः प्रायेणायासलिङ्गसंयुक्तः ।
उभयरसान्तरचारी कार्यः कृतको भवेद्रोषः[6] ।।२१।।

उत्साहो नाम उत्कर्षकारी उत्तमो भावः[7] । उत्तमप्रकृतिनिष्ठः[8] । स चाविषादशक्तित्यागादि[9]भिर्विभावैरुत्पद्यते । तस्य [10]धैर्यशौर्य[11]वैशारद्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः । अत्र श्लोकः–

असंमोहादिभिर्व्यक्तो[12] व्यवसायनयात्मकः ।
उत्साहस्त्वभिनेयः स्यादप्रमादोत्थितादिभिः[13] ।।२२।।

भयं नाम अवरात्मको भावः[14] । स्त्रीनीचप्रकृतिकः[15] । स च गुरुराजापराधश्वापद[16]शून्यागाराटवीपर्वतगहनस्थानगजाहि[17]दर्शननिर्भर्त्सनकान्तार[18]दुर्दिननिशान्धकारोलूकनक्तंचरारावश्रवणादिभिर्विभावैः समुत्पद्यते । तस्य प्रकम्पितकरचरणहृदयकम्पनस्तम्भमुखशोषजिह्वापरिलेहनस्वेदवेपथुत्रासपरित्राणान्वेषणधावनोत्क्रुष्टादि[19]भिरनुभावैरभिनयः प्रयोक्तव्यः ।
[20]अत्र श्लोकाः–

गुरुराजापराधेन रौद्राणां चापि दर्शनात् ।
श्रवणादपि घोराणां भयं मोहेन जायते ।।२३।।

---

1. $M_{1,4}$ V_2 स्फुरदौष्ठ, 2. $M_{1,4}$ V_2 प्रणयाभि°, 3. D_1 P_{1-4} °गताश्रयं
4. P_{1-4} नु, 5. for ft d, $M_{1,5}$ V_2 तस्याभिनयः प्रयोक्तव्यः, 6. $M_{3,5}$ V_1 भवति कोपः
7. D_1 M_1 V_{1-2} P_{1-4} om. उत्कर्ष°... भावः, 8. D_1 M_1 V_2 P_{1-4} om. निष्ठ, 9. D_1 M_1 V_2 P_{1-4} °शक्तिधैर्यशौर्यादि°
10. D_1 V_1 ins. स्थैर्य 11. D_1 P_{1-4} ins. त्याग M_1 V_2 त्यागारंभ
12. M_1 °दनिष्प्रत्तो V_2 °दनिवृत्तो (interesting variants), 13. D_1 P_{1-4} ins. °नेयोऽसावप्रमादक्रियादिभिः।
14. D_1 M_1 V_{1-2} P_{1-4} om. अव°...भावः, 15. D_1 M_1 V_{1-2} P_{1-4} om. °कं and om. स च
16. D_1 M_1 V_2 P_{1-4} om. °श्वापद°, 17. D_1 M_1 V_2 P_{1-4} om. गहनस्थानगजाहि°, 18. $M_{1,4}$ V_2 om. °कान्तार°
19. P_{1-4} °नोत्कटादि°, 20. P_{1-4} om. अत्र श्लोकाः and the three following verses (See note).

गात्रकम्पन[1]वित्रासैर्वक्त्रशोषणसंभ्रमैः ।
विस्फारितेक्षणैः कार्यमभिनेयक्रियागुणैः ॥२४॥

सत्त्व[2]वित्रासनोद्भूतं भयमुत्पद्यते नृणाम् ।
स्रस्ताङ्गाक्षिनिमेषैस्तदभि[3]नेयं तु नर्तकैः ॥२५॥

अत्रार्या भवति-

करचरणहृदयकम्पैः मुखशोषणवदनलेहनस्तम्भैः[4] ।
[5]सम्भ्रान्तवदनवेपथुसन्त्रासकृतैरभिनयोऽस्य ॥२६॥

जुगुप्सा नाम घृणात्मको भावः[6] । स्त्रीनीचप्रकृतिकः । सा चाहृद्यदर्शनश्रवणा[7]दिभिर्विभावैः समुत्पद्यते । तस्याः सर्वाङ्गसंकोचनिष्ठीवन[8]मुखविकूणन[9]हृल्लेखादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

[10]भवति चात्र श्लोकः-

नासाप्रच्छादनेनेह गात्रसंकोचनेन च ।
[11]उद्वेजनैः स[12]हृल्लेखैर्जुगुप्सामभिनिर्दिशेत् ॥२७॥

विस्मयो नाम हृदयोल्लासकक्षेपको भावः । स च[13] मायेन्द्रजालमानुषकर्मातिशयचित्रपुस्त[14]शिल्प[15]विद्यातिशयादिभि[16]र्विभावैः समुत्पद्यते । तस्य नयनविस्तारानिमेषप्रेक्षित[17]भ्रूक्षेप[18]रोमहर्षण[19]शिरःकम्पसाधुवादादि[20]भिरनुभावैरभिनयः प्रयोक्तव्यः ।

[21]भवति चात्र श्लोकः-

कर्मातिशयनिर्वृत्तो विस्मयो[22] हर्षसंभवः ।
सिद्धिस्थाने त्वसौ[23] साध्यः प्रहर्षपुलकादिभिः[24] ॥२८॥

एवमेते स्थायिभावा[25] प्रत्यवगन्तव्याः ।

---

1. M_3 गात्रादिकंप^0, 2. M_1 V_2 तत्र (for सत्त्व^0), 3. M_1 V_2 ^{0}षैश्चाप्यभि^{0}, 4. for ft. b, M_{3-4} स्तम्भजिह्वोपलेहमुखशोषैः
5. for ft. cd, M_1 V_2 स्रस्तसुविषण्णगात्रैस्तस्याभिनयस्सवित्रासैः। D_1 V_1 P_{1-4} प्रयोक्तव्यः (for last four syllables)
6. D_1 M_5 V_{1-2} P_{1-4} om. घृणा... भावः। 7. D_1 V_1 ins. ^{0}परिकीर्तना^{0}, 8. P_{1-4} ^{0}निष्ठो निज^0, 9. V_2 ^{0}विघूर्णन^0
10. D_1 P_{1-4} replace the sentence पठत्यपि च-, 11. P_{1-4} om. the portion उद्वेजनैः... हर्षसंभवः। (27a-28b)
12. M_1 ^{0}जनेन हृ^{0} V_2 ^{0}नैश्च हृ^{0}, 13. D_1 $M_{1,4-5}$ V_{1-2} P_{1-4} om. हृदयो^{0}... च, 14. M_2 ^{0}पुत्रक^0
15. M_1 V_2 ^{0}विचित्रवपुस्तच्छिल्पादि^{0}, 16. D_1 $M_{1,2}$ V_2 ^{0}शयाद्यै^{0}, 17. D_1 $M_{1,5}$ V_2 ^{0}प्रेक्षण^0, 18. M_1 V_2 ^{0}क्षेपण^0
19. M_1 V_2 ins. ^{0}स्वेद^0, om. ^{0}शिरःकम्प^0, 20. M_2 ^{0}हर्षणादिभि^{0} (om. शिरःकम्पसाधुवाद), 21. $M_{1,3}$ V_2 om. भवति
22. D_1 om. from ^{0}हर्षण (in रोमहर्षण) to विस्मयो [i.e. the scribe misses the portion between हर्षण and हर्ष, reading second हर्ष for the first ^{0}हर्षण^0, even the portion that follow हर्षसंभवः...त्वसौ is added in upper margin], 23. P_{1-4} उत्तमेनावरैः (for सिद्धि^{0}...^{0}सौ), 24. for ft. d, M_1 V_2 हर्षाश्रुप्रलयादिभिः
25. $M_{2,4}$ V_1 स्थायिनो भावा and ins. रससंज्ञाः

[1]व्यभिचारिण इदानीं व्याख्यास्यामः[2] । अत्राह–व्यभिचारिण इति कस्मात् । उच्यते[3]–वि–अभि इत्येतावुपसर्गौ, चर इति गत्यर्थो[4] धातुः । [5]विविधमाभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः । [6]वागङ्गसत्त्वोपेताः प्रयोगे रसान् नयन्तीति व्यभिचारिणः । अत्राह[7]–कथं नयन्तीति । उच्यते । [8]लोकसिद्धान्त एषः–यथा सूर्य इदं दिने नक्षत्रमथानयतीति । न च तेन बाहुभ्यां स्कन्धेन वा नीयते । किंतु लोकप्रसिद्धमेतत् । यथेदं सूर्यो नक्षत्रं दिनं वा नयतीति । एवमेते व्यभिचारिण इत्यवगन्तव्याः । [9]तानिह संग्रहाभिहिताँस्त्रयस्त्रिंशद्व्यभिचारिणो भावान् वर्णयिष्यामः ।

तत्र **निर्वेदो** नाम–दारिद्र्यव्याध्यवमाना[10]धिक्षेपाक्रुष्टक्रोधताडनेष्टजनवियोगतत्त्वज्ञानादिभिर्विभावैः समुत्पद्यते । स्त्रीनीचकुसत्त्वानां[11] रुदितनिःश्वसितोच्छ्वसितसंप्रधारणादिभिरनुभावैस्तमभिनयेत्[12] । अत्र[13] श्लोकः–

दारिद्र्येष्टवियोगाद्यै[14]र्निर्वेदो नाम जायते ।
संप्रधारणनिःश्वासैस्तस्य त्वभिनयो भवेत् ।।२९।।

अत्रानुवंश्ये आर्ये भवतः

इष्टजनविप्रयोगाद्दारिद्र्याद्व्याधितस्तथा दुःखात् ।
ऋद्धिं परस्य[15] दृष्ट्वा निर्वेदो नाम संभवति ।।३०।।

बाष्पपरिप्लुतनयनः पुनश्च नि[16]श्वासदीन[17]मुखनेत्रः ।
योगीव ध्यानपरो[18] भवति हि निर्वेदवान्पुरुषः ।।३१।।

ग्लानिर्नाम–
वान्तविरिक्त[19]व्याधित[20]तपोनियमोपवासमनस्तापातिशय[21]मदनमद्य[22]सेवनातिव्यायामाध्वगमनक्षुत्पिपासानिद्राच्छेदादिभि[23]र्विभावैः समुत्पद्यते । तस्याः
क्षामवाक्यनयनकपोलोदर[24]मन्दपदोत्क्षेपणवे[25]पनानुत्साहतनुगात्रवैवर्ण्यस्वरभेदा[26]दिभिरनुभावैरभिनयः प्रयोक्तव्यः।

---

1. D_1 P_{1-4} om. व्याभि^{0}... अत्राह, **2.** M_1 V_2 वक्ष्यामः, **3.** M_1 V_2 ^{0}दित्युच्यते, **4.** D_1 V_1 P_{1-4} चर गतौ
5. M_1 V_2 वागंगसच्चोपेतान् विवि... ख्येन रसां प्रति व्यभिचारिणः।
6. D_1 P_{1-4} om. this sentence; instead read चरंति नयन्तीत्यर्थः।, **7.** D_1 P_{1-4} om. अत्राह
8. M_1 V_2 om. a large prose portion from लोक... ^{0}गन्तव्याः D_1 P_{1-4} om. लोक^0... एषः
9. D_1 P_{1-4} om. this sentence, **10.** D_1 ^{0}शापापमाना^{0} (शाप for व्याधि) P_{1-4} ^{0}शापमाना^{0} $M_{1,4}$ V_2 ^{0}द्योपगममाना^{0}
11. M_1 V_2 प्रकृतीनां (for कुसत्त्वानां) P_{1-4} om. स्त्री... त्त्वानां, **12.** D_1 M_1 V_2 P_{1-4} take तमभिनयेत् before रुदित^0...
13. D_1 M_1 V_2 P_{1-4} भवति चात्र, **14.** D_1 P_{1-4} ^{0}वियोगेषु M_1 V_2 ^{0}गैश्च, **15.** D_1 V_2 P_{1-4} परवृद्धिं वा
16. D_1 P_{1-4} पुनः पुनः श्वा^{0}, **17.** M_1 V_2 ^{0}दीर्घ^0, **18.** M_1 ^{0}चरो D_1 P_{1-4} ^{0}रतो, **19.** D_1 P_{1-4} ^{0}विरक्त^0
20. D_1 M_1 V_2 P_{1-4} om. ^{0}त^0 **21.** D_1 $M_{1,5}$ V_2 P_{1-4} ^{0}तिपान^0, **22.** D_1 M_1 V_2 P_{1-4} om. ^{0}मद्य^0
23. P_{1-4} om. विभावै... ^{0}भेदादिभि^{0}, **24.** D_1 M_1 V_2 om. ^{0}उदर^0, **25.** M_1 ^{0}कं^{0}, **26.** D_1 M_1 V_2 om. ^{0}स्वरभेद^0

अत्रार्ये भवतः–

वान्तविरिक्तव्याधिषु तपसा जरसा च जायते[1] ग्लानिः ।
कार्श्येन साभिनेया मन्दभ्र[2]मणेन[3] कम्पेन ।।३२।।

गदितैः क्षामक्षामैर्नेत्रविकारैश्च दीनसंचारैः ।
श्लथभावेना[4]ङ्गानां मुहुर्मुहुर्निर्दि[5]शेद् ग्लानिम् ।।३३।।

शङ्का नाम–संदेहात्मिका स्त्रीनीचप्रभवा[6] । चौर्या[7]भिग्रहणनृपापराधपापकर्मक[8]रणादिभिर्विभावैः समुत्पद्यते । तस्या[9] मुहुर्मुहुरवलोकनावकु[10]ण्ठनमुखशोषणजिह्वापरिलेहनमुखवैवर्ण्यस्वरभेद[11]वेपथु[12]शुष्कौष्ठकण्ठायास[13]साधर्म्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः[14] । अत्राकारसंवरणमपीच्छन्ति केचित्[15] । तच्च कुशलैरुपाधिभिरिङ्गितैश्चोपलक्ष्यम्।

अत्रार्ये भवतः–[16]

द्विविधा शङ्का कार्या ह्यात्मसमुत्था च परसमुत्था च ।
या तत्रात्म[17]समुत्था सा ज्ञेया दृष्टिचेष्टाभिः ।।३४।।

किंचित्प्रवेपिताङ्गस्त्वधोमुखो[18] वीक्षते[19] च पार्श्वानि ।
गुरुसज्जमानजिह्वः श्यामास्यः शङ्कितः पुरुषः ।।३५।।

असूया नाम नानापराधहेतुको[20] भावः । सा च परैश्वर्यसौभाग्यमेधा[21]विद्यालीलादिभिर्विभावैः समुत्पद्यते । तस्याश्च परिषदि[22] दोषप्रख्यापनगुणोपघात[23]चक्षुःप्रदानाधोमुखभ्रुकुटीक्रियावज्ञानकुत्सनादिभिरनुभावैरभिनयः प्रयोक्तव्यः । अत्रार्ये भवतः–

परसौभाग्येश्वरतामेधालीलासमुच्छ्रयान्दृष्ट्वा ।
उत्पद्यते ह्य[24]सूया कृतापराधो भवेद्यश्च[25] ।।३६।।

---

1. $P_{1\text{-}4}$ तपसा च विजयते(?), **2.** D_1 M_1 V_2 $P_{1\text{-}4}$ ^{0}क्र^0, **3.** M_1 V_2 ^{0}णानु^{0}, **4.** $M_{1,4}$ V_2 ^{0}भावाच्चा^{0}
5. M_1 V_2 ^{0}र्वि^{0}, **6.** D_1 M_1 V_2 $P_{1\text{-}4}$ ^{0}नीचानां, put संदे... नीचानां after समुत्पद्यते, **7.** M_1 V_2 ins. ^{0}द्य^0
8. M_1 V_2 ^{0}मरणा^{0}, **9.** D_1 M_1 V_2 $P_{1\text{-}4}$ सा च, **10.** $P_{1\text{-}4}$ ^{0}गु^{0} V_2 ^{0}कुण्ठित^0, **11.** D_1 M_1 $P_{1\text{-}4}$ ^{0}वर्णभेद^0 (for ^{0}वैव... भेद^0)
12. M_1 V_2 ^{0}वेपन^0, **13.** D_1 $P_{1\text{-}4}$ ^{0}कण्ठवायससा^{0}, **14.** D_1 M_1 V_2 $P_{1\text{-}4}$ ^{0}नुभावैरभिनीयते।
15. D_1 $P_{1\text{-}4}$ ^{0}मपि केचिदिच्छन्ति।
→ D_1 M_1 V_2 $P_{1\text{-}4}$ ins.
चौर्यादिजनिता शङ्का प्रायः कार्या भयानके ।
प्रियव्यलीकजनिता तथा शृङ्गारिणी मता ।।
16. D_1 $P_{1\text{-}4}$ om. भवतः, **17.** D_1 $P_{1\text{-}4}$ तत्र पर^0, **18.** M_1 V_2 ^{0}ङ्गो मुहुर्मुहुर्^{0} $P_{1\text{-}4}$ ^{0}तांगस्तथोन्मुखो(?), **19.** $P_{1\text{-}4}$ वीक्ष्यते
20. M_1 V_2 ^{0}धान्वेषणपरैश्वर्य^0 D_1 V_1 $P_{1\text{-}4}$ ^{0}धद्वेषपरै^{0}, these mss om. ^{0}हेतुको भावः सा च, **21.** M_1 V_2 om. ^{0}मेधा^{0}
22. M_2 V_2 (!)पर्षदि, **23.** M_1 V_2 ins. ^{0}ईर्ष्या^{0}, **24.** D_1 M_2 $P_{1\text{-}4}$ अभिनेतव्या^{0}, **25.** D_1 $P_{1\text{-}4}$ ^{0}स्तु

भ्रुकुटिकुटिलोत्कट्मुखैः सेर्ष्याक्रोधपरिवृत्तनेत्रैश्च[1] ।
गुणनाशनविद्वेषैस्तत्राभिनयः प्रयोक्तव्यः[2] ॥३७॥

मदो नाम–मद्योपयोगादुत्पद्यते । स च त्रिविधः पञ्चविध[3]भावश्च । अत्रार्या भवन्ति–

[4]ज्ञेयस्तु मदस्त्रिविध[5]स्तरुणो मध्यस्तथावकृष्टश्च[6] ।
करणं पञ्चविधं स्यात्तस्याभिनयः प्रयोक्तव्यः ॥३८॥

कश्चिन्मत्तो गायति रोदिति कश्चित्तथा हसति कश्चित्[7] ।
परुषवचनाभिधायी कश्चित्कश्चित्तथा स्वपिति ॥३९॥

उत्तमसत्त्वः शेते हसति च गायति च मध्यमप्रकृतिः ।
परुषवचनाभिधायी रोदित्यपि चाधमप्रकृतिः ॥४०॥

स्मितवचन[8]मधुररागो हृष्ट[9]तनुः किंचिदाकुलितवाक्यः ।
सुकुमारा[10]विद्धगतिस्तरुणमद[11]स्तूत्तमप्रकृतिः ॥४१॥

स्खलिताघूर्णितनयनः स्रस्तव्याकुलितबाहुविक्षेपः ।
[12]कुटिलव्याविद्धगतिर्मध्यमदो मध्यमप्रकृतिः[13] ॥४२॥

[14]नष्टस्मृतिर्हतगतिश्छ[15]र्दितहिक्काकफैः[16] सुबीभत्सः ।
गुरुसज्जमानजिह्वो निष्ठीवति[17] चाधमप्रकृतिः ॥४३॥

---

1. D_1 P_{1-4} ^{0}वर्त्तिभिश्चित्रैः M_1 V_2 ^{0}वृत्तवक्त्राद्यैः M_2 ^{0}वर्तनैश्चित्रैः
2. for ft d, D_1 P_{1-4} स्तस्याः कार्यः सदाभिनयः (M_1 V_2 रस्याः for स्तस्याः) □ (See note), **3.** M_2 om. ^{0}ध^0
4. M_1 V_{1-2} om. the entire verse, **5.** D_1 P_{1-4} त्रिविधस्तु मदः कार्यः, **6.** M_2 मध्यमनिकृष्टश्च
7. M_1 add here तथा सापिति from end of second line and misses the in-between portion, **8.** P_{1-4} ^{0}वदन^0
9. M_1 V_2 दुष्ट^0, **10.** P_{1-4} ^{0}मारो, **11.** M_2 ^{0}मन^0, **12.** $P_{1,4}$ om. this and the next (i.e. 43ab) lines
13. for ft d, M_2 ^{0}र्भवति मदो(न्)मत्तप्रकृतिः, **14.** M_1 om. the verse 43, **15.** P_{2-3} ^{0}र्हतश्च च्छ^0, **16.** V_2 ^{0}गतैः
17. M_2 ins. प्रणाशमुपयाति(!)

रङ्गे पिबतः[1] कार्या मदवृद्धिर्नाट्ययोगमासाद्य ।
कार्यो[2] मदक्षयो वै यः खलु पीत्वा प्रविष्टः स्यात् ॥४४॥

संत्रासाच्छोकाद्वा भयात्प्र[3]हर्षा[4]च्च कारणोपगतात्[5] ।
उत्क्रम्या[6]पि हि कार्यो मदप्रणाशः क्रमात् तज्ज्ञैः[7] ॥४५॥

एभिर्भावविशेषैर्मदो द्रुतं[8] संप्रणाशमुपयाति ।
अभ्युदयसुखै[9]र्वाक्यैर्यथैव शोकः[10] क्षयं याति[10] ॥४६॥

श्रमो नाम–अध्व[11]व्यायामसेवनादिभिर्विभावैः समुत्पद्यते । तस्य गात्रपरिमर्दन[12]संवाहनिःश्वसितविजृम्भित[13]मन्दपदोत्प्रेक्षण[14]नयनवदनविकूणन[15]सीत्कारा[16]दिभिरनुभावैरभिनयः प्रयोक्तव्यः ।

[17]अत्रार्या–

नृत्ताध्व[18]व्यायामा[19]न्नरस्य संजायते श्रमो नाम ।
निःश्वासखेदगमनैस्तस्याभिनयः प्रयोक्तव्यः ॥४७॥

आलस्यं नाम– खेदव्याधिगर्भस्वभावश्रमसौहित्या[20]दिभिर्विभावैः समुत्पद्यते स्त्रीनीचानाम् । तदभिनयेत्सर्वकर्मानभिलाष[21]शयनासननिद्रातन्द्रीसेवनादिभिरनुभावैः[22] । अत्रार्या–

आलस्यं त्वभिनेयं खेदोपगतं स्व[23]भावजं वापि ।
आहारवर्जितानामारम्भाणामनारम्भात् ॥४८॥

दैन्यं नाम–दौर्गत्यमनस्तापादिभिर्विभावैः समुत्पद्यते । तस्याधृति[24]शिरोरोग[25]गात्रगौरवान्यमनस्कता[25]मृजापरिवर्जनादिभिरनुभावैरभिनयः प्रयोक्तव्यः[26] ।

अत्रार्या–

चिन्तौ[27]त्सुक्यसमुत्था दुःखाद्या[28] भवति दीनता पुंसाम् ।
[29]सर्वमृजापरिहारैर्विविधोऽभिनयो भवेत्तस्याः ॥४९॥

---

1. M_1 V_2 बहिः (for ^{0}बतः) (the text then reads रङ्गेऽपि बहिः!)

2. M_2 om. the portion from मदक्षयो to कार्यो in the next verse, **3.** D_1 $P_{1\text{-}4}$ भयाच्च, **4.** M_1 V_2 प्रकर्षा^{0}

5. $P_{3\text{-}4}$ ^{0}गतः, **6.** D_1 $P_{1\text{-}4}$ उत्क्रान्त्या^{0}, **7.** last 4 syllables $P_{1\text{-}4}$ तथोनज्ञैः(!), **8.** M_2 मदोद्यतं

9. M_2 ^{0}दुःखै^{0} $P_{1\text{-}4}$ ^{0}दयैर्मुख^0, **10.** M_2 शोकाः... यान्ति

11. $P_{1\text{-}4}$ अर्थ^0; M_1 V_2 ins. गति; V_2 ins. further स्त्रीनीचानां तदभिनयै, **12.** D_1 M_1 $P_{2\text{-}4}$ om. परिमर्दन

13. D_1 M_1 V_2 $P_{1\text{-}4}$ ins. अङ्गमर्दन, **14.** D_1 M_1 V_2 $P_{1\text{-}4}$ ^{0}पदोत्क्षेपण^0, **15.** M_2 ^{0}निकुञ्चन^0

16. D_1 $P_{1\text{-}4}$ om. (from the list) नयन & सीत्कार, **17.** $P_{1\text{-}4}$ om. अत्रार्या and the verse

18. D_1 अध्वगतेर्, **19.** M_1 V_2 अध्वगतिव्यायामैर्न^0, **20.** D_1 M_1 V_2 $P_{1\text{-}4}$ ins. ^{0}गर्भ^0

21. D_1 $P_{1\text{-}4}$ ^{0}विद्वेष^0 M_1 V_2 ^{0}प्रद्वेष^0 (for ^{0}अनभिलाष^0), **22.** D_1 $P_{1\text{-}4}$ om. ^{0}रनुभावै^{0}, **23.** M_1 V_2 खेदव्याधिस्व^0

24. D_1 $P_{1\text{-}4}$ तच्चावृत्ति^{0}, **25.** D_1 $P_{1\text{-}4}$ om. ^{0}रोग^0 and ^{0}अन्यमनस्कता^{0}; M_1 V_2 ^{0}गात्रस्तंभमनःस्तंभ^0

26. D_1 $P_{1\text{-}4}$ ^{0}भावैरभिनेतव्यं, **27.** D_1 $P_{1\text{-}4}$ वित्तौ^{0} (D_1 notes चिन्ता in margin)

28. M_1 V_2 ^{0}द्वा, om. भवति, ins. भवेत् after दीनता

29. D_1 $P_{1\text{-}4}$ read the line as सर्वमृजानां परिमार्जनैश्च विविधैरभिनयोऽस्याः । (D_1 notes the crit. version in margin with नाना for विविधै)

चिन्ता नाम – ऐश्वर्यभ्रंशेष्टद्रव्यापहारदारिद्यादिभिर्विभावैरुत्पद्यते । तामभिनयेन्निःश्वसितोच्छ्वसित[1]संतापध्यानाधोमुखचिन्तन[2]तनुकार्श्यादिभिरनुभावैः । अत्रार्ये भवतः[3]–

ऐश्वर्येष्टद्रव्यापहारजनिता बहुप्रकारा तु ।
हृदयवितर्को[4]पगता नृणां चिन्ता समुद्भवति ।।५०।।

सोच्छ्वासै[5]र्निःश्वसितैः संतापैश्चैव हृदयशून्यतया[6] ।
अभिनेतव्या चिन्ता मृजाविहीनैरधृत्या[7] च ।।५१।।

मोहो नाम–दैवोपघातव्यसनाभिघात[8]व्याधि[9]भयावेगपूर्ववैरानु[10]स्मरणादिभिर्विभावैः समुत्पद्यते । तस्य निश्चैतन्य[11]भ्रमणपतनाघूर्णनादर्शनादिभिरनुभावै[12]रभिनयः प्रयोक्तव्यः ।

[13]अत्र श्लोकस्तावदार्या च–

अस्थाने तस्करान्दृष्ट्वा त्रासनैर्वा पृथग्विधैः[14] ।
तत्प्रतीकारशून्यस्य मोहः समुपजायते ।।५२।।

[15]व्यसनाभिघातभयपूर्ववैरसंस्मरणरोग[16]जो मोहः ।
सर्वेन्द्रियसंमोहात्तस्याभिनयः प्रयोक्तव्यः ।।५३।।

स्मृतिर्नाम–सुखदुःख[17]कृतानां भावानामनुस्मरणम् । सा च स्वास्थ्यजघन्यरात्रिनिद्राच्छेदसमानदर्शनोदाहरणचिन्ताभ्यासादिभिर्विभावैः समुत्पद्यते । तामभिनयेच्छिरःकम्पनावलोकनभ्रूसमुन्नमना[18]दिभिरनुभावैः । अत्रार्ये[19]–

सुखदुःख[20]मतिक्रान्तं तथा मतिविभावितं[21] यथावृत्तम् ।
चिरविस्मृतं[22] स्मरति यः स्मृतिमानिति वेदितव्योऽसौ ।।५४।।

स्वास्थ्याभ्यासस्मुत्था श्रु[23]तिदर्शनसंभवा स्मृतिर्निपुणैः ।
शिरउद्वाहनकम्पैर्भ्रू[24]क्षेपैश्चाभिनेतव्या ।।५५।।

---

1. D_1 $P_{1\text{-}4}$ om. ^{0}उच्छ्वसित^0, **2.** D_1 V_2 ins. ^{0}तनु^{0}, **3.** D_1 $P_{1\text{-}4}$ om. भवतः, **4.** M_1 V_2 ^{0}यौत्सुक्या^{0}
5. D_1 $P_{1\text{-}4}$ सोच्छ्वसितै^{0}, **6.** M_2 ^{0}शून्यत्वात्, **7.** $P_{1\text{-}4}$ विहीनेन धृत्या(?), **8.** M_1 om. ^{0}अभिघात^0
9. D_1 $P_{1\text{-}4}$ om. ^{0}व्याधि^{0}, **10.** M_1 V_2 om. ^{0}अनु^{0}, **11.** M_1 V_2 निश्चेष्टिताङ्ग^0, **12.** D_1 $P_{1\text{-}4}$ om. ^{0}रनुभावै^{0}
13. D_1 $P_{1\text{-}4}$ replace this phrase by भवत्यपि च– **14.** M_2 ^{0}र्विविधैरपि।, **15.** D_1 $P_{1\text{-}4}$ ins. अत्रार्या–
16. D_1 M_1 V_2 $P_{1\text{-}4}$ om. ^{0}रोग^0, add भवति after ^{0}जो, **17.** V_2 om. ^{0}दुःख^0, $P_{2\text{-}3}$ om. ^{0}ख^0, **18.** M_1 ins. ^{0}प्रहर्षण^0
19. $M_{1\text{-}2}$ V_2 ins. भवतः, **20.** D_1 $P_{1\text{-}4}$ ^{0}मसुख^0 (for दुःख), **21.** M_1 V_2 ins. विस्मृतञ्च(!)
22. M_1 V_2 om. चिरविस्मृतं, read residue as स्मरेद्यः स्मृतिमान् and drop the last part. **23.** M_1 स्मृ^{0}
24. M_2 V_2 ins. ^{0}वि^{0}

धृतिर्नाम–शौर्य[1]विज्ञानश्रुतिविभवशौचाचारगुरुभक्त्यधिकमनोरथा[2]र्थलाभ[3]क्रीडादिभिर्विभावैः समुत्पद्यते। तामभिनयेत्प्राप्तानां विषयाणामुपभोगादप्राप्तातीतोपहतविनष्टानामननुशोचनादिभिरनुभावैः । अत्रार्ये भवतः–

विज्ञानशौचविभवश्रुति[4]शक्तिसमुद्भवा धृतिः सद्भिः ।
भयशोकविषादाद्यै रहिता तु सदा प्रयोक्तव्या[5] ।।५६ ।।

प्राप्तानामुपभोगः[6] शब्दरसस्पर्शरूपगन्धानाम् ।
अप्राप्तैश्च[7] न शोको यस्यां हि भवे[8]द्धृतिः सा तु ।।५७।।

व्रीडा नाम–अकार्यकरणात्मिका । सा च[9] गुरुव्यतिक्रमणावज्ञानप्रतिज्ञातानिर्वहण[10]पश्चात्तापादिभिर्विभावैः समुत्पद्यते । तां निगूढवदनाधोमुखवि[11]चिन्तनोर्वी[12]लेखनवस्त्राङ्गुलीयक[13]स्पर्शननखनिकृन्तना[14]दिभिरनुभावैरभिनयेत् । अत्रार्ये–

किंचिदकार्यं कुर्वन्नेवं यो दृश्यते शुचिभिरन्यैः ।
पश्चात्तापेन युतो व्रीडित इति वेदितव्योऽसौ ।।५८।।

लज्जानिगूढवदनो[16] भूमिं विलिखन्नखांश्च[17] विनिकृन्तन् ।
वस्त्राङ्गुलीयकानां संस्पर्शं[18] व्रीडितः कुर्यात् ।।५९।।

चपलता नाम–रागद्वेषमात्सर्यामर्षे[19]र्ष्याप्रतिकूलादिभिर्विभावैः समुत्पद्यते । तस्याश्च वाक्पारुष्यनिर्भर्त्सनवधबन्धसंप्रहारताडना[20]दिभिरनुभावैरभिनयः प्रयोक्तव्यः । अत्रार्या भवति–

अविमृश्य तु यः कार्यं पुरुषो वधताडनं[21] समारभते ।
अविनिश्चितकारि[22]त्वात्स तु[23] खलु चपलो बुधैर्ज्ञेयः[24] ।।६०।।

---

1. D_1 P_{1-4} om. शौर्य⁰, 2. M_1 V_2 om. ⁰मनोरथ⁰, 3. M_1 V_2 ins. ⁰विविध⁰, 4. M_2 ins. ⁰धृति⁰
5. for ft d, M_2 भावै रहिता सदा योज्या, 6. M_1 V_2 ⁰भोगैः, 7. M_1 V_2 अप्राप्तौ हि, 8. M_1 V_2 विभवे (for हि भवेद्)
9. D_1 M_1 V_2 P_{1-4} om. सा च, 10. M_1 V_2 ins. ⁰कृतप्रत्यादिष्ट⁰, 11. M_1 V_{1-2} P_{1-4} om. ⁰वि⁰
12. D_1 P_{1-4} ⁰वि⁰ V_2 भू (for उर्वी), 13. M_1 V_2 ins. ⁰सं⁰, 14. D_1 V_1 P_{1-4} ⁰निस्तोदन⁰
15. D_1 P_{1-4} कुर्वाण एव यो M_1 V_2 कुर्वन् यो हि नरो, 16. M_2 वचनो, 17. V_2 नखैश्च, 18. M_2 सदा स्पर्शं
19. M_1 V_2 om. ⁰अमर्ष⁰, 20. M_1 V_2 ins. ⁰ज्ञापन⁰, 21. M_1 V_2 वधबन्धनादिकं, 22. D_1 P_{1-4} ⁰कार्य⁰
23. D_1 P_{1-4} om. हि, 24. M_2 हि बोद्धव्यः

हर्षो नाम- मनोरथलाभे[1]ष्टजनसमागमनमनःपरितोषदेवगुरुराजभर्तृप्रसादभोजनाच्छादनलाभोपभोगादिभिर्विभावैः समुत्पद्यते । तमभिनयेन्नयनवदनप्रसादप्रियभाषणालिङ्गन[2]कण्टकितपुलकिता[3]स्रस्वेदा[4]दिभिरनुभावैः ।

अत्रार्ये[5] भवतः-

अप्राप्ये प्राप्ये वा[6] लब्धेऽर्थे प्रियसमागमे वापि ।
हृदयमनोरथलाभे हर्षः संजायते पुंसाम् ।।६१।।

[7]नयनवदनप्रसादप्रियभाषालिङ्गनैश्च रोमाञ्चैः ।
ललितैश्चा[8]ङ्गविकारैः स्वेदाद्यैरभिनयस्तस्य ।।६२।।

आवेगो नाम - उत्पातवातवर्षाग्निकुञ्जरोद्भ्रमणप्रियाप्रियश्रवणप्रकृति[9]व्यसना[10]भिघातादिभिर्विभावैः समुत्पद्यते । तत्रोत्पात[11]कृतो नाम विद्युदुल्का[12]निर्घातप्रपतन[13]चन्द्रसूर्योपरागकेतुदर्शन[14]कृतः । तमभिनयेत्सर्वाङ्गस्रस्तता[15]वैमनस्यमुखवैवर्ण्यविषादविस्मयादिभिः । वातकृतं पुनरवगुण्ठनाक्षिमर्दन-वस्त्रसंगूहनत्वरितगमना[16]दिभिः[17] । वर्ष[18]कृतं पुनः[19] सर्वाङ्गसम्पिण्डनप्रधावनछन्ना[20]श्रयमार्ग[21]णादिभिः । अग्निकृतं तु धूमाकुलनेत्रताङ्गसंकोचन[22]विधूननातिक्रान्तापक्रान्ता[23]दिभिः । कुञ्जरोद्भ्रमणकृतमपि त्वरितापसर्पणचपल[24]गमनभयस्तम्भवेपथुपश्चादवलोकनविस्मयादिभिः । प्रियश्रवणकृत[25]मपि अभ्युत्थानालिङ्गनवस्त्राभरणप्रदाना[26]श्रुपुलकितादिभिः । अप्रियश्रवणकृतं तु भूमि[27]पतन[28]चलन[29]परिवर्तितपरिधावितविलापाक्रन्दादिभिः[30] । व्यसनाभिघातज[31] तु सहसापक्रम[32]णशस्त्रचर्मवर्म[33]धारण[34]गजतुरगरथा[35]रोहणसंप्रधारणादिभिः ।

इत्येषोऽष्टविधो ज्ञेय आ[36]वेगः संभ्रमात्मकः ।
[36a]स्थैर्येणोत्तममध्यानां नीचानां चापसर्पणैः[37] ।।६३।।

अत्रार्ये भवतः[38]

अप्रियनिवेदनाद्वा सहसा ह्यव[39]धारितारिवचनस्य ।
शस्त्राक्षेपत्रासादावेगो नाम संभवति ।।६४।।

---

1. P_{1-4} ins. °प्सितावाभीष्टजनसमागतमनुपुलकित (for °ष्टजनसमागमनमनः°) M_1 V_2 ins. °प्सितावाप्ती°
2. D_1 M_2 P_{1-4} om. °आलिङ्गन°, 3. D_1 P_{1-4} °मुकुलित° (for °पुलकित°), 4. M_1 V_2 ins. °उत्कृष्टललितताडन°
5. D_1 P_{1-4} अत्रार्या, 6. D_1 प्राप्ये वाप्राप्ये वा. P_{1-4} प्राप्ते वाप्राप्ते वा, 7. D_1 P_{1-4} om. the verse
8. M_1 ललितोपा°, 9. D_1 M_1 V_2 P_{1-4} om. °प्रकृति°, 10. P_{1-4} °नयनो°(?)
11. D_1 तत्रोपघात° (in margin) P_{1-4} धवोपोत(?), 12. M_{1-2} °दुल्का°, 13. P_{1-4} °प्रतपन°
14. M_1 V_2 °नादिभिर्विभावैरुत्पद्यते।, 15. M_1 ins. °विषण्ण°, 16. M_2 °नमना°, 17. M_2 V_2 °भिरनुभावैः।
18. D_1 P_{1-4} वर्षा°, 19. M_1 V_2 नाम, 20. P_{1-4} °छत्रा°, 21. D_1 M_1 V_2 P_{1-4} om. मार्ग°, 22. D_1 P_{1-4} °संवेग°
23. M_1 V_2 °तिक्रान्तपादा°, 24. M_1 °चञ्चल°, 25. V_2 om. °अपि अभ्यु°... °श्रवणकृतं, 26. P_{1-4} प्रदता°
27. P_{1-4} °कृतमप्युच्च°, 28. M_1 ins. °परिदेवित°, 29. M_1 V_{1-2} °विषम°
30. M_2 V_1 °परिवर्तनपरिधावनविलापनाक्रन्दनादिभिः, 31. P_{1-4} व्यसनोत्थं, 32. M_2 °पसर्पण°
33. D_1 P_{1-4} °धर्म° (for चर्मवर्म), 34. P_{1-4} ins. °वेपन°, 35. D_1 M_2 P_{1-4} om. °रथ°
36. M_2 V_1 एवमष्टविकल्पोऽयमा°, 36a. M_2 °धैर्ये°, 37. M_1 V_2 °सर्पणात्, 38. D_1 P_{1-4} om. भवतः
39. M_1 V_2 °नादिश्रवणादव°

अप्रियनिवेदनाद्यो [1]विषादभावाश्रयोऽनुभावोऽस्य[2] ।
सहसारिदर्शनाच्चे[3]त्प्रहरणपरिघट्टनैः कार्यः[4] ।।६५।।

जडता नाम-सर्वकार्याप्रतिपत्तिः । इष्टानिष्टश्रवणदर्शनव्याध्यादिभिर्विभावैः समुत्पद्यते[5] । तामभिनयेदकथनाभिभा[6]षणतूर्ष्णींभावा[7]निमेषनिरीक्षणपरवशत्वादिभिरनुभावैः । अत्रार्या-

इष्टं वानिष्टं वा सुखदुःखे[8] वा न वेत्ति यो मोहात् ।
तूष्णीकः परवशगः स भवति जडसंज्ञकः पुरुषः ।।६६।।

गर्वो नाम-ऐश्वर्यकुलरूपयौवनविद्याबला[9]दिभिर्विभावैः समुत्पद्यते । तस्या[10]सूया[11]वज्ञाधर्षणानुत्तरदानासंभाषणाङ्गावलोकनविभ्रमापहसन[12]वाक्पारुष्यगुरुव्यतिक्रमणाधिक्षेपा[13]दिभिरनुभावैरभिनयः प्रयोक्तव्यः[14] । अत्रार्या भवति[15]-

विद्यावाप्ते[16] रूपादैश्वर्यादथ धनागमाद्वापि ।
गर्वः खलु[17] नीचानां दृष्ट्यङ्गविचारणैः[18] कार्यः ।।६७।।

विषादो नाम-कार्या[19]निस्तरणदैवव्यापत्तिसमुत्थः । तमभिनयेत्सहायान्वेषणो[20]पायविचिन्तनोत्साहविघात[21]वैमनस्यनिःश्वसिता[22]दिभिरनुभावैरुत्तममध्यमानाम् । अधमानां तु विपरिधावनावलोकनमुखशोषणसृक्कपरिलेहननिद्रानिःश्वसितध्यानादिभिरनुभावैः[23] । अत्रार्याश्लोकौ[24]-

---

1. D_1 om. from °विषाद to इष्टा°, 2. M_2 °भावाश्रयात्तु कार्योऽसौ।, 3. M_1 V_2 निदर्शनं चेत्, 4. M_1 V_2 °ट्टनं कार्यम्।
5. D_1 om. समुत्पद्यते, 6. D_1 P_{1-4} °येदाकम्पनाभा°, 7. M_1 ins. °प्रतिमा°, 8. M_1 V_2 °दुःखं
9. M_1 V_{1-2} ins. °धनलाभ°, 10. D_1 P_{1-4} तम् (for तस्य), 11. M_1 V_2 om. °असूया°, 12. M_1 °आहनसन (see note)
13. M_2 om. गुरु°... °क्षेप°, 14. D_1 P_{1-4} °भावैरभिनयेत्।, 15. M_1 V_2 om. भवति, 16. M_1 V_2 °यौवन° (for °वाप्ते)
17. D_1 P_{1-4} स च (for खलु), 18. M_1 °विकारणैः, 19. M_1 V_2 कार्यारम्भा°, 20. M_1 V_2 °गवेषण° (अन्वे°)
21. P_{1-4} °निर्घात° P_{2-3} °निर्वात°, 22. D_1 P_{1-4} om. °निःश्वसित°, 23. D_1 P_{1-4} om. °रनुभावै°, 24. M_1 V_2 श्लोकश्च-

(Footnotes of Crit. Ap. of this page continued on page 59)

[25]कार्या[26]निस्तरणकृतश्चौर्या[27]भिग्रहणराजदोषाद्यैः ।
दैवादिष्टो योऽर्थस्तदसंप्राप्तौ[28] विषादः स्यात् ।।६८।।

वैचित्र्योपायचिन्ताभ्यां कार्यमुत्तममध्ययोः ।
निद्रानिःश्वसितध्यानैरधमानां तु योजयेत्[29] ।।६९।।

औत्सुक्यं नाम–इष्टजनवियोगानुस्मरणोद्यानदर्शना[30]दिभिर्विभावैः समुत्पद्यते । तस्य[31] दीर्घनिःश्वसिताधोमुखविचिन्तननिद्रातन्द्री[32]शयनाभिलाषा[33]दिभिरनुभावैरभिनयः प्रयोक्तव्यः[34] । [35]अत्रार्या भवति–

इष्टजनस्य[36] वियोगादौत्सुक्यं जायते ह्यनुस्मृत्या ।
चिन्तानिद्रातन्द्रागात्रगुरुत्वैरभिनयो ह्यस्य ।।७०।।

निद्रा नाम–दौर्बल्यश्रमक्लम[37]मदालस्यचिन्तात्याहारस्वभावादिभिर्विभावैः समुत्पद्यते । तामभिनयेद्वदनगौरवशरीरावलोकन[38]नेत्रघूर्णनविजृम्भणमान्द्यो[39]च्छ्वसित[40]सन्नगात्रताक्षिनिमीलनसर्वक्रियासंमोहा[41]-दिभिरनुभावैः । [42]अत्रार्ये भवतः–

आलस्याद्दौर्बल्यात्क्लमाच्छ्रमाच्चिन्तनात्स्वभावाच्च ।
रात्रौ जागरणादपि निद्रा पुरुषस्य [43]संभवति ।।७१।।

---

25. About the version
कार्यानिस्तरणाद्वा चौर्याभिग्रहणराजदोषाद्वा।
दैवादर्थविपत्तेर्भवति विषादः सदा पुंसाम्।। see note.

26. P_{1-4} कार्योऽनि^{0}, **27.** M_1 V_2 शौर्या^{0}, **28.** P_4 ^{0}प्तो, **29.** D_1 M_1 V_2 P_{1-4} दर्शयेत्, **30.** D_1 P_{1-4} om. ^{0}उद्यानदर्शन^0
31. D_1 V_1 P_{1-4} तद् (for तस्य), **32.** D_1 V_1 P_{1-4} ^{0}तन्द्रा^{0}, **33.** P_{1-4} om. अभिलाष, **34.** D_1 P_{1-4} ^{0}दिभिरभिनयेत्
35. D_1 P_{1-4} भवत्यपि च–, **36.** V_2 ^{0}जनादि^{0} M_2 ^{0}जनविप्र^0, **37.** M_1 V_2 om. क्लम
38. M_1 V_2 गात्रपरिलोलन (for शरी...कन), **39.** M_1 ^{0}मार्दव^0 (for मान्द्य) V_2 ^{0}गात्रविमर्दन^0 P_{1-4} ^{0}मार्द्व^0 (see note)
40. M_2 P_{1-4} ins. निःश्वसित, **41.** D_1 M_2 om. ^{0}सर्व... मोह^0, **42.** P_{1-4} अत्रान्तरे आर्ये, **43.** M_1 पुरुषेषु

तां[1] मुखगौरवगात्रप्रतिलोलन[2]नयनमीलनजडत्वैः ।
जृम्भणगात्रविमर्दैरनुभावैरभिनयः प्रयोक्तव्यः[3] ॥७२॥

अपस्मारो नाम–देवयक्षनागब्रह्म[4]राक्षसभूत[5]पिशाचादीनां ग्रहणानुस्मरणो[6]च्छिष्टशून्यागारसेवनाशुचिकालान्तरातिपातधातुवैषम्यादिभिर्विभावैः समुत्पद्यते । तस्य स्फुरितनिःश्वसितोत्कम्पितधावनपतनस्वेदस्तम्भन[7]वदनफेन[8]जिह्वापरिलेहनादिभिरनुभावैरभिनयः प्रयोक्तव्यः । [9]अत्रार्ये भवतः–

भूत[10]पिशाचग्रहणानुस्मरणोच्छिष्टशून्यगृहगमनात् ।
कालान्तरातिपातादशुचेश्च[11] भवत्य[12]पस्मारः ॥७३॥

सहसा भूमौ पतनं प्रकम्पितं वदनफेनमोक्षश्च ।
निःसंज्ञस्योत्थानं[13] रूपाण्येतान्यपस्मारे ॥७४॥

सुप्तं नाम[14]– निद्रासमुत्थम्। तदुच्छ्वसितनिःश्वसितसन्नगात्राक्षिनिमीलनसर्वेन्द्रियसंमोहनोत्स्वप्नायितादिभिरनुभावैरभिनयेत् ।[15]

अत्रार्या–
सोच्छ्वासैर्निःश्वासैर्मन्दाक्षिनिमीलनेन निश्चेष्टः ।
सर्वेन्द्रियसंमोहात्सुप्तं स्वप्नैश्च युञ्जीत[16] ॥७५॥

---

1. M_1 तस्या, 2. M_1 V_2 om. ^{0}प्रतिलोलन^0, 3. D_1 M_1 P_{1-4} ^{0}रभिनयेत् प्राज्ञः।, 4. V_2 om. ब्रह्म, 5. M_1 V_2 om. ^{0}भूत^0
6. P_{1-4} om. अनुस्मरण, M_1 V_2 ग्रहणादुच्छिष्ट^0, 7. M_1 V_2 om. स्तम्भन, 8. M_1 V_2 ins. हिक्का, 9. D_1 P_{1-4} भवति चात्र
10. P_{1-4} प्रेत^0, 11. D_1 P_{1-4} ^{0}शुचिषु च, 12. M_1 V_2 भवदेप^0, 13. M_1 V_2 निःसंज्ञाभ्युत्थानं
14. After सुप्तं नाम, vulgate editions - निर्णयसागर, GOS & Unni - ins. the following :- निद्राभिभवः; इन्द्रियविषयोपगमनमोहनक्षितितलशयनप्रसारणानुकर्षणादिभिर्विभावैः समुत्पद्यते । (See note)
15. After अभिनयेत् (in सुप्तप्रकरण), Vulgate editions insert the following verse (prefixed by अत्रार्ये भवतः)
निद्राभिभवेन्द्रियोपरमणमोहनैर्भवेत्सुप्तम् ।
अक्षिनिमीलोच्छ्वसनैः स्वप्नायितजल्पितैः कार्यः॥
16. for ft d, M_1 स्वप्नं स्वप्ने प्रयुञ्जीत।

विबोधो नाम-आहारपरिणामनिद्राच्छेदस्वप्नान्त[1]शब्दस्पर्शा[2]दिभिर्विभावैः समुत्पद्यते । तं जृम्भणाक्षिपरिमर्दनशयनमोक्षणाङ्गचलन[3]भुजाक्षेपाङ्गुलित्रोटनादिभिरनुभावैरभिनयेत् । अत्रार्या भवति-

आहारविपरिणामाच्छब्दस्पर्शादिभिश्च संभूतः ।
प्रतिबोधस्त्वभिनेयो जृम्भणवदना[4]क्षिपरिमर्दैः ।।७६ ।।

अमर्षो नाम-विद्यैश्वर्यधनबलाधिकैरधिक्षिप्त[5]स्यावमानितस्य वा समुत्पद्यते । तं[6] शिरःकम्पनप्रस्वेदनाधोमुखविचिन्तनध्यानाध्यवसायोपायान्वेषणादिभिरनुभावै[7]रभिनयेत् । अत्र श्लोकौ-

आक्षिप्तानां सभामध्ये विद्यैश्वर्य[8]बलाधिकैः ।
नृणामुत्साहसंपन्नो ह्यमर्षो नाम जायते ।।७७।।

उत्साहाध्यवसायाभ्यामधोमुखविचिन्तनैः[9] ।
शिरःप्रकम्पस्वेदाद्यैस्तं प्रयुञ्जीत पण्डितः[10] ।।७८।।

अवहित्थं नाम-आकारप्रच्छादनात्मकम् । तच्च लज्जाभयापजय[11]गौरवजैह्म्यादिभिर्विभावैः समुत्पद्यते। तस्यान्यथा[12]कथनाविलोकितकथाभङ्गकृतकधैर्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः[13] । अत्र श्लोको भवति-

धाष्ट्र्यजैह्म्यादिसंभूतमवहित्थं भयात्मकम्[14] ।
तच्चागणनया कार्यं नातीवोत्तरभाषणात् ।।७९।।

[15]**उग्रता** नाम-चौर्याभिग्रहणनृपापराधासत्प्रलापादिभिर्विभावैः समुत्पद्यते । तां च वधबन्धनताडननिर्भर्त्सनादिभिरनुभावैरभिनयेत् ।

अत्रार्या भवति-

चौर्याभिग्रहणवशा[16]न्नृपापराधादथोग्रता भवति ।
वधबन्धताडनादिभिरनुभावैरभिनयस्तस्याः ।।८०।।

[17]**मतिर्नाम**-नानाशास्त्रविचिन्तनोहापोहादिभिर्विभावैः समुत्पद्यते । तामभिनयेत् शिष्योपदेशार्थविकल्पनसंशयच्छेदादिभिरनुभावैः । भवति चात्र श्लोकः-

---

1. M_1 $V_{1\text{-}2}$ ins. ⁰तीव्र⁰, **2.** M_1 ins. ⁰रूपा⁰, **3.** D_1 M_1 ⁰वलन⁰ V_2 ⁰वदन⁰, **4.** M_1 V_2 ⁰वलन⁰, **5.** M_1 V_2 ⁰राक्षिप्त⁰
6. M_1 V_2 तस्य, **7.** M_1 V_2 ⁰रभिनयः प्रयोक्तव्यः ।, **8.** M_2 ⁰द्याशौर्य⁰, **9.** D_1 $P_{1\text{-}4}$ ⁰चिन्तितैः, **10.** M_1 V_2 नाट्यवित्
11. D_1 $P_{1\text{-}4}$ om. ⁰अपजय⁰, **12.** M_1 V_2 ⁰अन्य⁰ (om. था)
13. D_1 $P_{1\text{-}4}$ प्रयोक्तव्यः M_1 & V_2 miss a large portion at this point - from प्रयोक्तव्यः to अभिनयेत् (in उग्रताप्रकरण)
14. D_1 $P_{1\text{-}4}$ भयानक⁰, **15.** D_1 $P_{1\text{-}4}$ prefix अथ(!), **16.** D_1 $P_{1\text{-}4}$ ⁰ग्रहयोगा⁰
17. M_1 V_2 give मतिप्रकरण before उग्रताप्रकरण

नानाशास्त्रविनिष्पन्ना[1] मतिः संजायते नृणाम् ।
शिष्योपदेशार्थकृतस्तस्यास्त्वभिनयो भवेत् ।।८१।।

व्याधिर्नाम–वातपित्तकफसंनिपातप्रभवः । तस्य[1a] ज्वरादयो विशेषाः । ज्वरस्तु[2] द्वि[3]विधः–सशीतः सदाहश्च । तत्र[4] सशीतो नाम[5] प्रवेपितसर्वाङ्गोत्कम्पननिकुञ्चनाग्न्यभिलाष[6]रोमाञ्चहनुवलननासा[7]विकूणनमुखशोषण[8]परिदेवितादिभिरनुभावै-रभिनेयः । सदाहः पुनः[9] विक्षिप्ताङ्ग[10]करचरणभूम्यभिलाषानुलेपनशीताभिलाषपरिदेवितोत्क्रुष्टा[11]दिभिः । ये चान्ये व्याधयस्तेऽपि मुखविकूणन[12]गात्रस्तम्भनिःश्वसनस्तनितोत्क्रुष्टवेपना[13]दिभिरनुभावै[14]रभिनेयाः । अत्र श्लोको भवति–

समासतस्तु व्याधीनां कर्तव्योऽभिनयो बुधैः ।
स्रस्ताङ्गगात्रविक्षेपैस्तथा[15] मुखविकूणनैः[16] ।।८२।।

उन्मादो नाम–इष्टजनवियोगविभवनाशा[17]भिघातवातपित्तश्लेष्मप्रकोपादिभिर्विभावैरुत्पद्यते । तमनिमित्तहसितरुदितोत्क्रुष्टासंबद्धप्रलापशयनोपविष्टोत्थितप्रधावितनृत्तगीतपठितभस्मपांस्ववधूलनतृणत्रोटन[18]निर्माल्यकुचेल[19]चीरघट[20]कपाल[20]शरावाभरणधार[21]णोपभोगैरनेकैश्चानव[22]स्थितैश्चेष्टानु[23]करणादिभिरनुभावैरभिनयेत् ।

अत्रार्ये भवतः–

इष्टजनविभवनाशादभिघाताद्वातपित्तकफकोपात् ।
विविधाच्चित्तविकारादुन्मादो नाम संभवति ।।८३।।

अनिमित्तरुदितहसितोपविष्टगीतप्रधावितोत्क्रुष्टैः ।
अन्यैश्च विकारकृतैरुन्मादं संप्रयुञ्जीत ।।८४।।

मरणं नाम–व्याधिजमभिघातजं च । तत्र यदान्त्रकृच्छ्रूल[24]दोषवैषम्यगण्डपिटकज्वरविषूचिका[25]दिभिरुत्पद्यते तद्व्याधिप्रभवम् । अभिघातजं तु शस्त्राहिदंशविषपानश्वापदगजतुरगरथ[26]यानपात[27]विनाशप्रभवम् ।

एतयोरिदानीम[28]भिनयविशेषान्वक्ष्यामः–तत्र व्याधिजं विषण्णगात्रव्या[29]यताङ्गविचेष्टितनिमीलितनयनं हिक्कोर्ध्वश्वासोपेत[30]परिजनानवेक्षिताव्यक्ताक्षरकथनादिभिरनुभावैरभिनयेत् । अत्र श्लोको भवति–

---

1. D_1 V_1 P_{1-2} °शास्त्रार्थसंपन्ना SV. °शास्त्रार्थबोधेन, **1a.** M_2 तस्याः, **2.** M_1 V_2 ins. खलु, **3.** M_1 V_2 वि°
4. M_1 V_2 om. तत्र, **5.** M_1 V_2 तावत्, **6.** D_1 P_{1-4} om. °निकु... लाष°, **7.** D_1 P_{1-4} °हेतुचलनास्य, **8.** P_{1-4} ins. °अस्र°,
9. D_1 P_{1-4} सदाहस्तु, **10.** M_1 V_2 वस्त्र (for अङ्ग), **11.** D_1 ins. °वेपन°, **12.** V_2 °विघूर्णन, **13.** M_1 V_2 ins. °परिदेवन°
14. D_1 P_{1-4} om. °रनुभावै°, **15.** M_1 V_2 रुजा (for स्तथा), **16.** V_2 विघूर्णनैः, **17.** M_1 V_2 ins. °व्यसन°
18. D_1 P_{1-4} om. °तृणत्रोटन°, **19.** D_1 P_{1-4} om. °कुचेल°, **20.** M_1 V_2 °वीरपट°, om. °कपाल°
21. D_1 P_{1-4} °स्पर्शन (for धारण), **22.** D_1 P_{1-4} °रन्यैश्चाव्यव°, **23.** D_1 P_{1-4} om. °अनु°
24. D_1 P_{1-4} om. यदा... च्छ्रूल°, **25.** D_1 (ins. in margin) P_{1-4} विचर्चिका°, **26.** D_1 P_{1-4} ins. °पशु°
27. M_1 V_2 °पतन°, **28.** D_1 P_{1-4} एतेष्विदानीम°, **29.** M_1 V_2 °गात्रमप्या°, **30.** P_{1-4} °श्वासोत्पतन°

व्याधीनामेकभावो हि मरणाभिनयः स्मृतः ।
विषण्णगात्रैर्निश्चेष्टैरिन्द्रियैश्च विवर्जितः[1] ।।८५।।

अभिघातजे तु नानाप्रकारा[2] अभिनयविशेषाः[3] । यथा शस्त्रक्षते तावत्सहसा भूमिपतन[4]वेपन[5]स्फुरणादिभि[6]रभिनयः प्रयोक्तव्यः । अहिदष्टविषपीतयोर्विषवेगा[7] यथा–कार्श्यवेपथुदाहहिक्काफेनस्कन्धभङ्गजडतामरणानीत्यष्टौ[8] । अत्र श्लोकौ भवतः–

कार्श्यं तु प्रथमे वेगे द्वितीये वेपथुस्तथा ।
दाहं तृतीये हिक्कां च[9] चतुर्थे संप्रयोजयेत् ।।८६।।

फेनं च[10] पञ्चमे कुर्यात्षष्ठे स्कन्धस्य भञ्जनम्[11] ।
जडतां सप्तमे कुर्यादष्टमे मरणं तथा ।।८७।।

अत्रार्या भवति–

श्वापदगजतुरगरथो[12]द्भवं तु पशुयानपतनजं वापि ।
शस्त्रक्षत[13]वत्[14]कुर्यादनवेक्षितगात्रसंचारम् ।।८८।।

इत्येवं मरणं ज्ञेयं[15] नानावस्थान्तरात्मकम् ।
प्रयोक्तव्यं बुधैः सम्यग्यथाभावाङ्गचेष्टितैः ।।८९।।

त्रासो नाम–विद्युदुल्काशनिपातनिर्घाताम्बुधर[16]महासत्त्व[17]पशुरवादिभिर्विभावैरुत्पद्यते । तं संक्षिप्ताङ्गोत्कम्पनवेपथुस्तम्भरोमाञ्चगद्गदप्रलापादिभिरनुभावैरभिनयेत् । अत्र श्लोको भवति–

महाभैरवनादाद्यैस्त्रासः समुपजायते ।
स्रस्ताङ्गाक्षिनिमेषैश्च[18] तस्य त्वभिनयो भवेत् ।।९०।।

---

1. M_1 विवर्जितैः, 2. D_1 P_{1-4} om. ^{0}प्रकारा^{0}
3. Southern version recounts in some mss. the five types under मरण as:-
शस्त्रक्षताहिदष्टविषपीतगजादिपतितश्वापदहताः, 4. V_2 om. ^{0}वेपनस्फुरण^0, 5. D_1 P_{1-4} ^{0}विकंपन^0 (for ^{0}वेपन^0)
6. M_1 V_2 ins. ^{0}रनुभावै^{0}, 7. D_1 P_{1-4} अहिदष्टे विषपीते नानाविषवेगैर्यथा, 8. D_1 M_1 V_2 P_{1-4} ins. विषवेगाः ।
9. M_1 V_2 तु, 10. M_1 V_2 तु, 11. for ft d, P_{1-4} स्यात् षष्ठे स्कन्धभञ्जनम्।, 12. M_1 V_2 om. ^{0}रथ^0
13. V_2 om. ^{0}क्षत^0, 14. M_1 ^{0}जप^0 (for वत्), 15. for ft a, D_1 P_{1-4} इत्येतन्मरणं प्रोक्तं
16. M_1 V_2 ^{0}म्बुदरव^0 om. ^{0}महा^{0}, 17. M_1 V_2 ins. दर्शन, 18. for ft. c, M_1 V_2 स्रस्ताङ्गार्धनिमेषाद्यैस्

वितर्को नाम–संदेहविमर्शप्रत्ययादिभि[1]र्विभावैरुत्पद्यते । तमभिनयेद् विविध[2]विचारितप्रश्न[3]संप्रधारणमन्त्रसंगूहनादिभिरनुभावैः । अत्र श्लोको भवति–

विचारणादिसंभूतः[4] संदेहातिशयात्मकः[5] ।
वितर्कस्त्वभिनेयस्तु[6] शिरोभ्रूक्षेप[7]कम्पनैः ।।९१।।

[8]एवमेते त्रयस्त्रिंशद्व्यभिचारिणो भावा देशकालावस्थानुगतमध्यमाधमोत्तमैः स्त्रीपुंसैः प्रयोगवशादुपपाद्या इति ।

त्रयस्त्रिंशदिमे[9] भावा विज्ञेया व्यभिचारिणः[10] ।
सात्त्विकांस्तु पुनर्भावान्प्रवक्ष्याम्यनु[11]पूर्वशः ।।९२।।

अत्राह–किमन्ये भावाः सत्त्वेन विनाभिनीयन्ते यस्मादुच्यन्ते एते सात्त्विका[12] इति । अत्रोच्यते । इह हि सत्त्वं नाम मनःप्रभवम् । तच्च समाहितमनस्त्वादुच्यते[13] । मनसः समाधौ सत्त्वनिष्पत्तिर्भवति[14] । तस्य च योऽसौ स्वभावो स्तम्भस्वेद[15]रोमाञ्चाश्रवैवर्ण्यादिकः[16] (यथाभावोपगतः) स न शक्योऽ[17]न्यमनसा कर्तुमिति । लोकस्वभावानुकरणत्वाच्च[18] नाट्यस्य सत्त्वमीप्सितम् । को दृष्टान्तः । [19]इह हि नाट्यधर्मीप्रवृत्ताः सुखदुःखकृता भावास्तथा सत्त्वविशुद्धाः[20] कार्या यथा सरूपा भवन्ति । तत्र[21] दुःखं नाम रोदनात्मकं तत्कथमदुःखितेन, सुखं च प्रहर्षात्मक[22]मसुखितेनाभिनेयम्[23] । एतदेवास्य सत्त्वं यद्दुःखितेन सुखितेन वाश्रुरोमाञ्चौ दर्शयितव्याविति कृत्वा सात्त्विका भावा इत्यभिव्याख्याताः । [24]त इमे–

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः[25] ।।९३।।

अत्रार्याः– तत्र

क्रोधभयहर्षलज्जादुःखश्रमरोगतापघातेभ्यः ।
व्यायामक्लमघर्मैः[26] **स्वेदः** संपीडनाच्चैव ।।९४।।

---

1. P_{1-4} om. ^{0}र्विभावै... संगूहनादिभि^{0}, 2. D_1 ^{0}विहित^0, 3. M_1 ^{0}प्रजा^{0} (?प्रज्ञा?) V_2 ^{0}संज्ञा^{0}, 4. P_{1-4} ^{0}संभूतैः
5. For ft b D_1, स संदेहो भयात्मकः P_{1-4} त्रयात्मकः M_1 V_2 सन्देहजननात्मकः, 6. V_2 स्यात्, 7. V_2 ^{0}पक्ष^0
8. D_1 P_{1-4} om. the entire prose-sentence, 9. D_1 P_{1-4} ^{0}दमी, 10. for ft b, D_1 P_{1-4} संविज्ञेयाः प्रयोक्तृभिः।
11. M_1 V_2 व्याख्यास्याम्यनु^{0}, 12. D_1 P_{1-4} येनैते सात्त्विका उच्यन्ते ।, 13. D_1 P_{1-4} ^{0}दुत्पद्यते
14. D_1 P_{1-4} मनःसमाधानाच्च सद्योनिर्वृतिरिति।, 15. D_1 P_{1-4} om. स्तम्भस्वेद^0, 16. D_1 P_{1-4} ^{0}दिकृतः
17. D_1 P_{1-4} शक्यते, 18. D_1 P_{1-4} ^{0}करणाच्च, 19. M_1 V_2 ins. अत्राह।
20. M_1 V_2 शुद्धाधिष्ठितः (कार्यो यथा सरूपो भवति–sing.), 21. D_1 P_{1-4} om. तत्र, 22. P_{1-4} ^{0}त्मकं तत्कथम^0
23. M_1 V_2 नेतुं शक्यते (om. एतदेवास्य... दर्शयितव्यौ) इति सत्त्वं समीप्सितमिति कृत्वा सात्त्विको नाम इति भावः।
24. D_1 P_{1-4} om. from त इमे... to अत्रार्याः। (See note), 25. V_2 स्मृताः, 26. D_1 P_{1-4} ^{0}धर्मात्

हर्षभयशोक[1]विस्मयविषादरोषादि[2]संभवः **स्तम्भः** ।
शीतभयहर्षरोषस्पर्शजरारोगजः[3] **कम्पः** ।।९५।।

आनन्दामर्षाभ्यां धूमाञ्जनजृम्भणाद्भयाच्छोकात् ।
अनिमेषप्रेक्षणतः शीताद्रोगाद्भवेद**श्रु**[4] ।।९६।।

शीतक्रोधभयश्रमरोगक्लमतापजं च **वैवर्ण्यम्** ।
स्पर्शभयशीत[5]हर्षात् क्रोधाद्रोगा[6]च्च **रोमाञ्चः** ।।९७।।

स्वरभेदो भयहर्षक्रोधजरा[7]रौक्ष्य[8]रोगमदजनितः ।
श्रममूर्च्छामदनिद्राभिघातमोहादिभिः **प्रलयः** ।।९८।।

एवमेते बुधैर्ज्ञेया भावा ह्यष्टौ तु सात्त्विकाः ।
कर्म चैषां प्रवक्ष्यामि ह्यनु[9]भावानुभावकम् ।।९९।।

निःसंज्ञो निष्प्रकम्पश्च स्थितः[10] शून्यजडाकृतिः ।
स्कन्नगात्रतया चैव[11] **स्तम्भं** त्वभिनयेद्बुधः ।।१००।।

व्यजन[12]ग्रहणा[13]च्चापि स्वेदापनयनेन च ।
स्वेदस्याभिनयो योज्यस्तथा वाताभिलाषतः[14] ।।१०१।।

मुहुःकण्टकितत्वेन तथोल्लुक[15]सनेन च ।
[16]**रोमाञ्च**स्त्वभिनेयो वे गात्रसंस्पर्शनेन च ।।१०२।।

---

1. M_1 V_2 ⁰रोग⁰, **2.** D_1 $P_{1\text{-}4}$ ⁰रोगवश⁰ M_1 V_2 ⁰मदरोष⁰ (for ⁰रोषादि⁰), **3.** M_1 V_2 संभवः (for रोगजः)
4. M_1 V_2 ⁰दस्रं, **5.** M_1 V_2 ⁰वात⁰, **6.** $P_{1,4}$ ⁰रागात्⁰, **7.** M_1 V_2 om. जरा, **8.** $P_{1\text{-}4}$ om. ⁰रौक्ष्य⁰, **9.** SV रस⁰
10. M_1 V_2 ⁰स्मितशून्य⁰, **11.** for ft c, D_1 M_1 $P_{1\text{-}4}$ निःसंज्ञः स्तब्धगात्रश्च, **12.** $P_{1\text{-}4}$ व्यंजक⁰
13. D_1 om. from चापि the whole verse and निश्चेष्टो निष्प्रकम्पः (100a. cf. conspectus below)
14. M_1 ⁰लाषकः, **15.** See note, **16.** SV पुलकेन च रोमाञ्चं गात्रस्पर्शेन दर्शयेत्।

स्वरभेदोऽभिनेतव्यो[1] भिन्नगद्गदनिस्वनैः[2] ।
वेपनात्स्फुरणात्कम्पा**द्वेपथुं** संप्रयोजयेत् ।।१०३।।

मुखवर्णपरावृत्त्या नाडीपीडनयोगतः ।
वैवर्ण्यमभिनेतव्यं प्रयत्नादङ्गसंश्रयम्[3] । ।१०४।।

बाष्पाम्बुप्लुतनेत्रत्वान्नेत्रसम्मार्जनेन च ।
[4]मुहुरश्रुकणापातै**रस्रं** त्वभिनयेद्बुधः ।।१०५।।

निश्चेष्टो निष्प्रकम्पत्वादव्यक्तश्वसितादपि ।
महीनि[5]पतनाच्चापि **प्रलयाभिनयो** भवेत् ।।१०६।।[6]

एकोनपञ्चाशदिमे[7] यथावद्भावास्त्यवस्था गदिता मयेह[8] ।
भूयश्च[9] ये यत्र रसे नियोज्यास्ताञ्श्रोतुमर्हन्ति च विप्रमुख्याः ।।१०७।।[10&11]

---

1. for ft a, D_1 $P_{1\text{-}4}$ स्वरभेदं तथा चैव, **2.** M_1 V_2 ⁰विस्वरैः, **3.** SV ⁰त्तद्धि दुष्करम्
4. D_1 M_1 V_2 $P_{1\text{-}4}$ replace the verse by one line नेत्रसम्मार्जनैर्बाष्पैरश्रु चाभिनयेद्बुधः, **5.** M_1 V_2 मेदिनी⁰
6. See note, **7.** D_1 $P_{1\text{-}4}$ अमी (for इमे), **8.** D_1 $P_{1\text{-}4}$ मया वः, **9.** D_1 $P_{1\text{-}4}$ एषां च M_1 V_2 येषां च

10. After 107 and अत्र श्लोकाः the M_2 codex has the following verses (see note)
शङ्का व्याधिस्तथा ग्लानिश्चिन्तासूया भयं तथा ।
विस्मयश्च वितर्कश्च स्तम्भश्चपलता तथा ।।
रोमाञ्चहर्षौ निद्रा च तथोन्मादमदावपि ।
स्वेदश्चैवाचहित्थं च प्रलयो वेपथुस्तथा ।।
विषादश्रमनिर्वेदा गर्वावेगौ धृतिः स्मृतिः ।
मतिर्मोहो विबोधश्च सुप्तमौत्सुक्यलज्जिते ।।
क्रोधामर्षौ च हासश्च शोकोऽपस्मार एव च ।
दैन्यं च मरणं चैव रतिरुत्साहसंयुता ।।
त्रासवैवर्ण्यरुदितैः स्वरभेदः शमोऽपि च ।
जडता च तथा षट् च चत्वारिंशत्प्रकीर्तिताः ।।
11. After 107 and अत्र श्लोकाः D_1 V_2 $P_{1\text{-}4}$ give the following verse:-
ग्लानिः शङ्का ह्यसूया च श्रमश्चपलता तथा ।
सुप्तं निद्रावहित्थं च शृङ्गारे वेपथुस्तथा ।। (See note)

Concordance of Vv. 100-107

Crit. ver.		LV
100ab	निःसंज्ञो	102ab (निश्चेष्टो…)
100cd	स्कन्नगात्र	102cd
101ab	व्यजन	101ab
101cd	स्वेदस्याभिनयो	101cd
102ab	मुहुःकण्टकितेन	104ab
102cd	पुलकेन	104cd
103ab	स्वरभेदो	103cd
103cd	वेपनात्	103ab
104ab	मुखवर्ण	105cd
104cd	वैवर्ण्य	106ab
105ab	बाष्पाम्बु	105ab
105cd	मुहुरश्रुकणा	om.
106ab	निश्चेष्टो (a=variant of 100a)	om.
106cd	महीनिपतनाच्चापि	106cd
107		107

अत्र श्लोकाः-

आलस्यौग्र्यजुगुप्साख्यै[1]रेवं भावैस्तु वर्जिताः[2] ।
उद्भावयन्ति **शृङ्गारं** सर्वे भावाः स्वसंज्ञया ॥१०८॥

यथावसरमेते हि स्थायिसञ्चारि सत्त्वजाः ।
उद्दीपयन्ति शृङ्गारं रसमासाद्य संज्ञितम् ॥१०९॥

ग्लानिः शङ्का ह्यसूया च श्रमश्चपलता तथा ।
सुप्तं निद्रावहित्थं च **हास्ये** भावाः[3] प्रकीर्तिताः ॥११०॥

निर्वेदश्चैव चिन्ता च दैन्यं ग्लान्यस्रमेव च ।
जडता मरणं चैव व्याधिश्च **करुणे** स्मृताः[4] ॥१११॥

[5]गर्वोऽसूयामदोत्साहा वावेगोऽमर्ष एव च ।
क्रोधश्चपलताऽथ च विज्ञेया **रौद्र**सम्भवाः ॥११२॥

असंमोहस्तथोत्साह आवेगो हर्ष एव च ।
मतिश्चैव तथोग्रत्वममर्षो मद[6] एव च ॥११३॥

---

1. D_1 $P_{1\text{-}4}$ ^{0}भिः, **2.** for ft b, D_1 M_1 V_2 $P_{1\text{-}4}$ भावैस्तुपरिवर्जिताः।, □ See note on 109

3. D_1 M_1 V_2 $P_{1\text{-}4}$ हास्यभावाः, **4.** V_2 रसे

5. In D_1 $V_{1\text{-}2}$ $P_{1\text{-}4}$, verse 112 occurs after 114, in contravention to the accepted order of the रस[s]. This order is restored in SV which is followed here. **6.** M_1 V_2 ^{0}ग्रत्वं हर्ष उन्माद

रोमाञ्चः प्रतिबोधश्च क्रोधोऽसूया धृति[1]स्तथा ।
गर्वश्चैव वितर्कश्च **वीरे** भावा भवन्ति हि[2] ।।११४।।

स्वेदश्च वेपथुश्चैव रोमाञ्चो गद्गदस्तथा ।
त्रासश्च मरणं चैव वैवर्ण्यं च **भयानके** ।।११५।।

अपस्मारस्तथोन्मादो विषादो मद[3] एव च ।
मृत्यु[4]र्व्याधिर्भयं चैव भावा **बीभत्स**संश्रिताः ।।११६।।

स्तम्भः स्वेदश्च मोहश्च रोमाञ्चो विस्मयस्तथा ।
आवेगो जडता हर्षो मूर्च्छा चैवा**द्भुत**श्रयाः ।।११७।।

ये त्वेते सात्त्विका भावा नानाभिनयसंश्रिताः[5] ।
रसेष्वेतेषु सर्वे ते ज्ञेया नाट्यप्रयोक्तृभिः ।।११८।।

न ह्येकरसजं काव्यं किंचिदस्ति प्रयोगतः[6] ।
भावो वापि रसो वापि[7] प्रवृत्तिर्वृत्तिरेव वा ।।११९।।

[8]बहूनां[9] समवेतानां रूपं यस्य भवेद्बहु ।
स मन्तव्यो रसः स्थायी शेषाः संचारिणो मताः ।।१२०।।

दीपयन्तः प्रवर्तन्ते ये पुनः स्थायिनं रसम् ।
ते नु संचारिणो ज्ञेयास्ते हि स्थायित्वमागताः ।।१२१।।

---

1. D_1 ध्वनि^{0}, **2.** $P_{1\text{-}4}$ वै, **3.** $P_{1\text{-}4}$ व्यंजनो नाम (?!), **4.** M_1 V_2 मतिर्^{0}

5. $P_{1\text{-}4}$ नानालाभसमाश्रयाः। D_1 ^{0}भाव^0 (for लाभ), **6.** D_1 $P_{1\text{-}4}$ ^{0}जं, **7.** $P_{1\text{-}4}$ चापि

8. D_1 $P_{1\text{-}4}$ om. Vv. 120-127. M_1 V_2 also om. Vv. 121, 124 to 127, **9.** M_1 V_2 सर्वेषां

विभावानुभावयुतो ह्यङ्गवस्तुसमाश्रयः ।
संचारिभिस्तु संयुक्तः स्थाय्येव तु रसो भवेत् ।।१२२।।

स्थायी सत्त्वातिरेकेण प्रयोक्तव्यः प्रयोक्तृभिः ।
संचार्याकारमात्रेण स्थायी यस्माद[1]वस्थितः ।।१२३।।

ये त्वेते सात्त्विका भावा नानाभिनययोजिताः ।
रसेष्वेतेषु सर्वेषु ते ज्ञेया नाट्यकोविदैः ।।१२४।।

न ह्येकरसजं काव्यं नैकभावैकवृत्तिकम् ।
विमर्दे रागमायाति प्रयुक्तं हि प्रयत्नतः ।।१२५।।

भावा वापि रसा वापि प्रवृत्तिर्वृत्तिरेव वा ।
बीभत्साद्भुतशान्तानां त्रैविध्यं नात्र कथ्यते ।।१२६।।

सत्त्वप्रयोजितो ह्यर्थः प्रयोगोऽत्र विराजते ।
विदित्वा हि विराजन्ते[2] लोके चित्रं हि दुर्लभम् ।।१२७।।

नानाभावार्थसंपन्नाः[3] स्थायिसत्त्वाभिचारिणः[4] ।
पुष्पा[5]वकीर्णाः कर्तव्याः काव्येषु हि रसा बुधैः[6] ।।१२८।।

एवं रसाश्च भावाश्च त्र्यवस्था नाटके स्मृताः ।
य एवमेताञ्जानाति स गच्छेत्सिद्धिमुत्तमाम् ।।१२९।।

इति श्रीभारतीये नाट्यशास्त्रे भावव्यञ्जनो नाम सप्तमोऽध्यायः ।

---

1. M_1 V_2 यस्माद्व्य^0
→ After 126, SV ins.
षण्णां रसानां त्रैविध्यम् नानाभावरसान्वितम् ।
2. For ft c, M_1 V_2 चित्राणि न विरज्यन्ते, **3.** M_1 V_2 ^{0}निष्पन्नाः, **4.** For ft b, D_1 $P_{1\text{-}4}$ स्थायिभावा विचालिनः
5. M_1 V_2 पुंसा^{0}, **6.** For ft d, M_1 V_2 काव्ये सत्त्वरसाश्रयाः ।
→ After 128, D_1 $P_{1\text{-}4}$ ins.
सर्वेषां समवेतानां रूपं यस्य भवेद्बहु ।
स मन्तव्यो रसः स्थायी शेषाः संचारिणो मताः ।

NOTES

Notes : Chapter I

I.1 Dwivedi rejects the verse as spurious since it does not mention the कर्ता of प्रवक्ष्यामि. Even according to Abhinavagupta, he says, some initial *Karika*s are written by Bharata's pupils.

I.3 It is observed that at many places the M-mss. (which, in a way, represent for us here the Southern Version) give us a shorter and more compact version generally without loss of the meaning and avoiding unnecessary flourishes of language.

It has generally been accepted that Indian Mss-tradition hardly missed anything consciously – particularly, anything important and meaningful; it has always added, but rarely missed. Therefore, in attempting to prepare a critical text, it can be considered relatively safer to accept the Southern Version, particularly where it offers a meaningful and smooth text and does not show any lapse in the meaning. Hence, the critical text presented here generally follows the SV or the M-mss. It was observed in the process of editing Valmiki Ramayana also that the Southern Version (SV) has retained a better and older text. The same experience is repeated in the case of Natyasastra also.

I.21 It goes without saying that the general rule that SV/M-mss form the basis of the Crit. text of NS attempted here, is to be followed carefully and judiciously; where the Southern text does not appear to be consistent, the Northern Version (indicated here as LV=larger version) is to be adopted for the critical text, The portion of Vv. 21-34, mentioning the names of the hundred sons of Bharata is one such example of making exception to the general rule. The reason is this : In Indian tradition, the numbers शत and सहस्र are first employed only to indicate the innumerability of the members of that class, yet, care has later been taken to justify that number (शत or सहस्र) with exactness. We see this attitude in the literature of सहस्रनाम-works for various deities. It is, therefore, expected that if the पुत्रशत of भरत is mentioned, the text (or the composer of the text) would always make sincere attempt to justify that number by mentioning either hundred or more names of भरतपुत्र[5]. The Southern text received by us mentions the names in number which falls much short of the expected शत which does not conform to our understanding of Indian tradition as indicated above. We have, therefore, adopted the LV in the case of these 14 verses, and given the text of the SV in the Crit. app.

The same mode has been adopted in the case of the section mentioning the names of the *Apsaras*es below Vv. 39-41.

I.72 P_1 & P_4 write प्रष्टुं in the text and correct it as द्रष्टुं in the margin. These two mss. are very often corrected in the margin. Single and double दण्ड^s are added at the end of each line and *Adhyaya*s and *sloka* numbers on each folio are added on top right margin of each folio. Also, letters missing in the text are indicated by काकपद and given in margin.

P_4 appears to be the oldest of the P-mss. It seems to have had no दण्ड^s, no verse numbers, and many letters were missed in the text. The writing, however, is clear. Someone, after the acquisition of the ms., had added दण्ड^s, corrections and additions, and consecutive numbering of the slokas.

However, the close affinity of all the P-mss is very striking. They all seem to have been copied from the same source (which could perhaps be the codex P_4 in its original form).

I.97 Both the LV and SV variants of this verse have something to recommend. We have accepted SV according to the accepted rule.

The LV reading:

क्वचिद्धर्मः क्वचित्क्रीडा क्वचिदर्थः क्वचिच्छमः।
क्वचिद्धास्यं क्वचिद्युद्धं क्वचित्कामः क्वचिद्वधः।।

shows a thoughtful arrangement of the thematic elements of नाट्य : the first line corresponding to the four पुरुषार्थ^s, क्रीडा replacing काम and transposing the order of the middle two; and the second arranging the worldly situations in contrast – laughter and fight, love or murder. In fact, all the feet have a slight hint at contrastive elements.

The SV arranges the पुरुषार्थ^s in ft. 1 & 4, thus beginning and ending the verse with them, while the worldly emotions are contained in between only as an extension or variety of the worldly play. This *may be* justified as more proper, for these elements are the varied themes of the drama – which is itself क्रीडा (or क्रीडनीयक) where अर्थ & शम being of lesser importance have to be relegated to the last (not final) position.

I.105 This verse is not accepted by GOS & Dwivedi, Ghosh includes it with an asterisk indicating uncertainty about its authenticity.

Notes : Chapter II

II.21 The situation of D_1 and P_1 as seen here implies that D_1 is compared with P_1 and suitably revised.

II.23 (Passage in critical apparatus.) This is obviously a repetition, even v.24 is repetition, but it is so repeated in SV, hence accepted here also.

II.27 M_2 M_4 M_5 give ह्यकठिना, 'soft, non-firm', but any injuction asking to build a structure on soft soil is against all intelligence. Again SV reading वा (with च?) is strongly doubtful; and च is sometimes used to mean वा!, and is fully supported by mss. (cf. M. Monier Williams, p. 380 col 2, "*ca* may be used for *va*, 'either' 'or'").

The M variants in this contexts are interesting: M_1 adds प्र to कठिना, M_3 adds, unusually, an अवग्रह between the conflicting कृष्णा and गौरी, the remaining three give वा alongwith च, which is either conflicting or redundant.

The variants appear to have arisen on account of the close similarity of letters च, प, व, and ह in Malayalam Script.

II.47 These minor correspondences between D_1 & P_{1-4} show that they form one group of manuscripts, whereas M_1 & V_{1-2} form another group of MSS.

II.66 Reading of 3 M mss is मत्तवारिणी, which is again repeated, with different MSS, at some places below. This line against SV; पायस for the safety or security of the pillars makes no sense.

II.80 निर्यूह = निर्व्यूह. cf. **शिशुपालवध**. ३. ५५.b वितर्दिनिर्यूहविटङ्कनीड: Mallinatha's comment... वितर्दयो विहारवेदिकाः। तासां निर्यूहा मत्तवारणाख्या अपाश्रयाः । 'निर्यूहो मत्तवारणः' इति वैजयन्ती। तेषां विटङ्का उपरितन्यः कपोतपालिकाः त एव नीडाः कुलाया यस्य सः।

Notes : Chapter VI

VI.4 P.30 Crit. Ap. passage. Relegating this verse to Crit. Ap. is a difficult judgement. It is omitted in M_2 and M_{4-5}. As can be seen from Crit. ap. gone before, M_1 and M_3 very often show affinity with V_{1-2}, whereas the remaining three Mss appear to be united and (perhaps) uncontaminated. If we talked of Northern and Southern recensions (which are too big words for this small project) we could have kept this verse in the critical text with wavy lines below. Since we have decided to accept southern version as original (or the oldest or the 'UR') text, we try to follow the purest S version represented here by the three Mss which appear to be the most isolated or uncontaminated.

VI.21 P.32 One of the few cases where SV is not accepted, because the reading ^{0}सादो here is actually contradicted by its SV reading in Ch. VII.

VI.24 fn.5 The critical reading is reminiscent of the event in Ch. I, where ब्रह्मा had advised भरत–कैशिकीमपि योजय (I.36b).

VI.26 P.33 The western variation of सुषिर as शुखिर is notable in view of the tradition of Vedic recitations in this part of the country.

P.33 fn.14 The prevalent reading कश्चिदर्थः is not supported by MSS (except P_{2-3}). D_1 adds ^{0}प्य^0 in the margin. Looking to the central-most position and importance of रस, the emphasis of अपि is fully justified also. Also, it is supported by Abhinava, cf. GOS, Vol. I, p 294.line 6.

P.33 fn.22 This is a strange case of reading-variants. A group of comparatively (perhaps) isolated (and therefore hypothetically uninfluenced by commentators) Mss of M-version, again in majority, have the reading षड्रसाः । The concept of षाडवरस first appears in Abhinavagupta, even the concept of पानकरस is inherent in Vamana's exposition of गुण[5] but not explicitly mentioned as such. The reading षड्रसा, therefore, seems to be more ancient than षाडवादयो रसा.

P.33 fn.23 This is perhaps the strongest case of entirely independent variants to prove the affinity of M_1 & V_2, as well as to prove the text-revision of this group of Mss.

P.33 fn.26 A good example of how the variants arise : The reading would be हर्षादींश्चाप्यधिगच्छन्ति। The scribe read प्य as व्य and then (1) corrected प्यधि as व्याधि, (2) did not understand ⁰श्चा⁰, thought it useless and dropped, (3) and then again corrected ⁰दीं⁰ (acc. pl.) as 0दि0 to form a compound with व्याधि. You could ask : How can हर्षादि be called व्याधि? Well, the scribe either did not think, or he justified it (to himself) by thinking that if शमप्रधान शान्त is the प्रकृति, then all these emotions like हर्ष etc. can be called व्याधि with some justification! प and व are intermistakable not only in Devanagari but even in Malayalam Script.

VI.37P.35fn.1 It is strange that this sentence has been dropped from the text by M. Ghosh as well as the editors of GOS (Vol. I.p.294) and relegated to Crit. Ap. We can imagine their reasons for doing so. Ghosh was creating a sensible text as it appeared to him, while GOS.editors were trying to construct a text according to Abhinava's commentary. Neither had a text independent of commentators' influence as their goal. However, one sentence in Abhinava's text itself seems to refer to this sentence in the text. It is : एवं हि भावस्यैवोपक्रमपर्यवसानवर्तित्वमुक्तं स्यादित्यास्तां चैतत् । (GOS.I.p.294, ll.19-20). "Thus, (according to the view referred to in sloka 37) it is भाव^s which should be taken to mean स्थायिभाव^s termed as रस^s." (The sentence is included in the text by Unni, cf. Vol. II p.162) The sentence lends itself to more than one interpretations of which at least one is recurrent in भरत, cf. स्थायिभावान् रसत्वमुपनेष्यामः 44 ff. below (cf. अभिनव GOS.I.p.339), स्थायी भावो रसनाम लभते (GOS,I,p.349 & here p.47) etc. and is vindicated by poeticians like दण्डिन्, भट्टलोल्लट, कुन्तक etc.. What is more, the sentence itself recurs below at VII.27.ff. exactly as it is here!! However, here it is included purely on mss-evidence of SV, which we have shown to be at least older than the other ones.

VI.44 P.36 It appears that prose offers greater scope for variants, perhaps on account of the scribal efforts to add speech-nuances to the prose; verses, on the other hand, have limited scope in this matter.

VI.56 P.38 According to the transcriber of M-mss, the portion from V.57 to V.62 (including the last four verses of हास्यरस and the entire section on करुणरस) is

missing in M_2 to M_5. This was counterchecked by getting M_2 read by another script-reader who also confirmed that it misses the portion from अस्थानहसितं (VI.57a) to ⁰मोहागमैश्च (VI.62a). The text re-starts : ...परिदेवितैर्विलपितैश्च । अथ रौद्रो नाम क्रोधस्थायिभावात्मकः ।... The fragility and highly damaged condition of Malayalam palm-leaf manuscripts needs urgent attention.

VI.82 ff.P.44 In this attempted crit. edn. of Natyasastra Ch. VI, the portion of Santarasa obviously has no place. None of the MSS collated here for this edition has this portion. Yet, as in the case of the names of the sons of Bharata and those of *Apsaras*es, here also we make an exception and give the section in an Appendix to Ch. VI. The portion was first included in this place by M. Ramakrishna Kavi, the editor of the first edition of NS, Vol. 1 in GOS in 1926. Kavi prepared first edition of NS from 40 mss. (or their transcripts); he grouped them broadly according to places (क–काव्यमाला, ख–Grosset, च-Ujjain, ज-Tanjore & Mysore, ट and ठ Malayalam mss., प-Press-copy prepared by the editor's father, and so on) and gave these letters in crit. ap. for noting variants. Again, he felt "great difficulty in fixing the recension used by the commentator" Abhinava who gave "only the beginnings of important sentences or words as *pratika*s and quotes from other parts of the text. No single manuscript follows the commentator throughout according to his pratikas, but A recursion follows more closely till the end of the 13th chapter, then the ma Ms. follows it till the end of the 20th and then ta MSS as far as the 23rd chapter, ma and na from the 24th to 27th chapters, ja 28, 29 and 30 and bha and ma in 31 and 32 chapters and ca from 33 to 37 chapters" (GOS, ii edn. 1956, Preface, p.61).

The crit. app. remark over this portion (vide GOS, NS, Vol. I, 1956, p.332) is as follows: अ.म.ब.पुस्तकेषु शान्तरसग्रन्थो नास्ति । 'त' पुस्तक एव विद्यते । न. शान्तमिदानीं आख्यास्यामः तत्र– Now, त पुस्तक is a transcript of an old palm-leaf Malayalam ms. No. 1405 collated with another palm-leaf ms No. 1406 of the printed catalogue of the Palace Library of H.H.Maharaja of Travancore, Trivandram (cf. *ibid*, Preface, p.9) procured by K.S.R.Sastri, the editor of second edition, whereas "ma and na are two Malabar MSS. of the reconciliation class" (*ibid*. p.61), says Kavi, the first editor. According to him, "All the copies obtained in the Telugu, Tamil, Kanarese and Malayalam

districts, with the exception two (cf. ma and na above!) in the last named country, represent the earlier recension... (*ibid*, p.59-60)

One remark by Kavi is very significant and illuminating in this context. He says "Both the recensions seem to have been used according to the commentaries available. But the older recension was studied where no commentator was available. Dhananjay used A set (i.e. Northern, later recension) when he quoted from Bharata in his *Dasarupa* but Bhoja of the same court used B text (Southern, earlier recension) in quoting the same passage in his *Srngaraprakasa*. (*ibid*. p.60).

Thus, it is obvious that the *Santa-rasa* section is not a part of the older text of NS, it was interpolated in the text later and this is conformed by mss-evidence.

Notes : Chapter VII

VII.8ff p.46 fn.21 The systematic treatment or pattern of describing the स्थायिभावs and व्यभिचारिभावs (and also सात्त्विक भावs) in SV is noteworthy: (1) In the case of a स्थायिभाव, first, its nature or characteristic (रतिः आमोदात्मको भावः, शोकः दुःखप्रदो भावः, विस्मयो हृदयोल्लासकक्षेपको etc.) is described, then the विभावs producing it are indicated and finally the अनुभावs or bodily gestures to be acted to convey that स्थायिभाव (through व्यभिचारिs to be described next) to the audience are indicated; (2) in the case of व्यभिचारिभावs only विभावs and अनुभावs are to be given; both these types of भावs are described in prose after which they are also described with almost the same details in verses; (3) whereas the सात्त्विकभावs are described in group, first their विभावs (and not according to the order of their mention) and then their अनुभावs (in order) - all very briefly and in verses only. The order of the first mention of all the भावs (cf. VI.16 - 21) is to be followed in their detailed description and becomes a minor guiding principle in editing the critical text, specifically in cases like a different order as seen in MSS of P group. Where the order is broken (as in the case of विभावs of सात्त्विक भावs cf.Vv.VII.95-99), the verse of their first mention (cf. VII.94=VI.21) is repeated to confirm the order original which, it implies, is to be followed next in their अनुभावs. The distinction of metres also altracts our attention. The running text of NS is *very likely* in अनुष्टुप् (and, maybe, prose in some places) while that in आर्या metre could be portions quoted from other sources. Should that also be a principle in the restoration of the text ?

VII.p.47 fn.1 This, a remnant or reminder of the Southern text, actually confirms the principle (described above) of the distinction of treatment of different levels of भावs.

VII.p.47 fn.6 From numberless instances noted above, it is more than obvious that, even while speaking of southern version, our most reliable bases would be M_2 and

M_5 (and to some extent M_4) since M_1 (and often M_3) have almost always shown affinity to V_2, and less frequently to V_1.

VII.p.49 fn.20 D1 gives this portion (i.e. from अत्र श्लोका: and the three verses) in the text but it is yellow pigmented showing that they are to be wiped out or omitted from the text. This means that D1 is first copied from some other source and then revised by comparing it with a Pune MS.

VII.37 fn.2 Beyond this Verse, the transcriber from South could not continue his work of noting variants from M-mss. Therefore, one amateur volunteer (cf. above, the mention of counter-checking) helped in noting the readings of M_2; the remaining three mss. had to be given up for want of time. Also, the palm-leaf mss. of these codices are extremely brittle, broken, corrupt and much too often interrupted.

VII.66.ff (गर्वप्रकरण) The uni-codex variant आहनसन seems to be important. आहनस्या is a lascivious -कामोद्दीपक मन्त्र (Skt.-Hindi Eng. Dictionary of सूर्यकांत, Orient Longman, 1995, p.84), आहनस्य (in Vedic context) "unchasteness, lasciviousness, obscenity" (cf. A Skt.-Eng. Dictionary, Monier-Williams, Oriental Publishers, Delhi, 1899. Reprint data not given, p. 162, col. ii) The word आहनसन, though not a strictly grammatical formation, seems to mean this quality for lewdness in the context of गर्व arising from विभाव[5] like यौवन, ऐश्वर्य, रूप, बल etc.

VII.68 p.59 fn.25 The other version of this verse, given in Crit. ap., is smoother, more recommendative, and accepted by Unni, GOS and निर्णयसागर has ab from fn. passage and cd as our crit. text. Anyway, we have constructed the text from the mss. consulted by us.

VII.70.ff p.59 fn.39 मार्द्व (for मान्द्य) in P.mss. In the context of निद्रा, गात्रमार्दव (M_1 codex-reading) can be understood, but मार्द्व is inexplicable. मार्द्वीक, "made of grapes, grape-wine' is found in dictionaries, but मार्द्व! The enthusiasm of the scribe can be appreciated, but here he is, once at least, overshooting the target by forming an ungrammatical form.

VII.74.ff p.60 fn.14 None of the mss. collated by us has the portion relegated in crit. app.; yet (1) since a few mss. not covered by us have it, (2) since निर्णयसागर, GOS and Unni have included it in their text, and (3) the portion appears to confirm the

general pattern of the treatment of व्यभिचारिभाव^{s}, it is given in crit. app. Dwivedi also rejects it. However, सुप्तं नाम निद्रासमुत्थम् । can be taken as a complete sentence, to conform to the pattern. Also from the point of view of acting, it appears difficult to distinguish between निद्रा and सुप्तम्.

VII.94 p.64 fn. 25 = VI.21. The reason of its omission (in D_1 P_{1-4}) i.e. avoiding repetition, is obvious; but the logic of its repetition (SV, M_1 V_2) is also already shown above.

VII.102 P_3 writes तथोत्पुल्लकुसनेन च, then puts deletion sign on letter त्पु like this. P_1 and P_4 do not make this mistake. The relations of P-mss are queer and interesting. All the four are almost uniform in their readings.

VII.106 It needs to be noted that the order of रस^{s}, स्थायिभाव^{s}, व्यभिचारिभाव^{s}, and सात्त्विकभाव^{s} is generally the same both in their first mention in the beginning of Ch. VI and in their individual treatment thereafter in Ch. VII. However, the order is not maintained in the treatment of the causes of सात्त्विक भाव^{s} (Vv. 94-98) even in the codices of SV. It is this exception, perhaps, that has necessitated the re-mention of the verse recounting सात्त्विकभाव^{s} (cf. VI.21=VII.93). It may be noted that only these five verses are in आर्या metre in the flow of the normal अनुष्टुभ् verses before and after. Bharata is perhaps quoting these आर्या^{s} from some source.

The treatment of their अनुभाव^{s} (Vv. 100-107) are in अनुष्टुभ् again and follow the order. However this position cannot be vindicated so far as the versions other than the southern are concerned.

That is one more reason to accept the SV as the basic text.

VII.107 fn.10 This is one more occasion to make an exception to our general rule of following the SV in the reconstruction of the critical text of Natyasastra. For obvious reasons; the recounting of the 46 व्यभिचारिभाव^{s} employable in शृङ्गार is redundant and a drudgery. Merely mentioning the three to be omitted (in v.108) is enough; it serves the purpose. Mentioning all the 46 once again, that too in a haphazard manner (or at least, so it seems to this editor) is against the rule of brevity so characteristic of the SV.

VII.107 fn.11 This verse occurs in LV. Unni accepts this in this text, ignoring the fact 3 feet of the verse are repeated in the verse of हास्य also only a couple of verses below. Again, once the three verses to be omitted in श्रृङ्गार are mentioned, any other recounting in any number is redundant.

VII.109 This verse is found in SV only. The reasons for accepting it in the crit. text are : (1) it occurs in the SV which we have accepted to generally follow; (2) it somehow seems to amplify सर्वे भावाः in the previous verse, which is a better way to emphasize the implied importance of that phrase rather than recounting them all by name (in five श्लोकs which we have relegated to the crit. app.); (3) the general pattern of mentioning भावs employable in a particular रस in only one verse is excepted in the case of वीर (Vv.113-114) also.